It is to be noted that Raghunātha Śiromaṇi has not commented on *MV*. His com. on perception runs upto *Anyathā-khyāti-vāda*. At one place only he mentions *Nyāya-līlā-vatī-prakāśa* of Vardhamāna. Indeed he seems to be shy about taking names of persons whom he refers or criticises. He does not even take the name of Pakṣadhara when he discusses his view. As mentioned before, *Anumāna-dīdhiti* is unquestionably his masterpiece : it runs upto *bādha-prakaraṇa* of *hetvābhāsa*. Here he mentions only once *Anvīkṣānvaya-tattva-bodha*, a com. on *Nyāyasūtras* by Vardhamāna. Śiromaṇi is a prolific writer and among his works mention may be made of his commentaries on Udayana's works besides one *Padārtha-khaṇḍana* in which he seeks to refute some of the time-honoured views of the Nyāya-Vaiśeṣika school.

Post-Śiromaṇi period

The period after Śiromaṇi is indeed very rich and a galaxy of intellectuals contributed to the growth and development of Navya-Nyāya in the line of the master. It may be noted here that excepting a few among these stalwarts none did write on *TC*. Śiromaṇi caught the imagination of these reputed exponents of Navya-Nyāya so effectively that they could hardly reach the original texts of Gaṅgeśa and discuss them. In this section we write about those authors and their works who have commented on *TC*.

Jānakīnātha Bhaṭṭācārya Cūḍāmaṇi

Jānakīnātha is the reputed author of *Nyāya-siddhānta-mañjarī*, a widely popular work on Nyāya among scholars outside Bengal. The author has therein referred to another work of his known as *Maṇi-marīci*, obviously a com. on *TC*.[61] His son, Rāmabhadra, in his com. on *Padārtha-*

61. *Vistaras tv asmākaṁ maṇi-Marīci-nibandhana-Tātparya-Dīpikayor anusandheyaḥ* (*Nyāya-siddhānta-mañjarī* p. 212).

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

khaṇḍana quotes from the same.[62] It is not difficult to determine his age; he belongs to the last quarter of the fifteenth century and the beginning of the sixteenth. Jānakīnātha quotes from Śiromaṇi's *Padārtha-khaṇḍana* in his *Mañjarī* His other works are *Ānvīkṣikī-tattva-vivaraṇa* and *Ātma-tattva-dīpikā*.

Kaṇāda Tarkavāgīśa

In the introductory verse of his *Bhāṣāratna*[63], Kaṇāda describes himself as the disciple of Cūḍāmaṇi who is none other than Jānakīnātha. But, it is rather surprising that in his com. on *TC*, known as *Anumāna-maṇī-vyākhyā*, he offers salutation to Sārvabhauma instead of Jānakīnātha.[64] It is also very difficult to identify whom he mentions as his *parama-guru.*[65] Obviously, he is not Vāsudeva Sārvabhauma as none of the quotations and references are traceable in Sārvabhauma's com. It is presumed that they are from *Maṇi-marīci*.

Haridāsa Nyāyālaṅkāra Bhaṭṭācārya

Haridāsa's com. on Udayana's *Nyāya-kusumāñjali* is a most important work. His comm. on the three sections of *Āloka* have been brought to light. Complete ms. copies of his com. on *TC*, known as *Śabda-maṇi-parīkṣā* is preserved in the library of Dacca University, where he is described as Nyāyālaṅkāra. A perusal of his works may confirm the view that he is earlier than Mathurānātha.

Bhavānanda Siddhāntavāgīśa

Bhavānanda is a most prolific writer who has commented on all the important works of Śiromaṇi. A com. on *TC*

62. *Ibid. pratyakṣa-khaṇḍa* (section on *abhāva*), p. 47
63. Published in the Sanskrit Sahitya Parishad Series, Calcutta.
64. *Sārvabhaumapadāmbhoja-bhramarīkṛtamaulinā* |.
65. *Paramaguravas tatre'ty asya*········ |.

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

known as *Śabdamaṇi-sāra-mañjarī* written by him is mentioned in his com. on *Anumāna-dīdhiti* (section on *sat-pratipakṣa*)[66].

Guṇānanda Tarkavāgīśa

Yet another eminent writer on Navya-Nyāya is Guṇānanda whose com. on *TC* known as *Pratyakṣa-maṇi* is preserved in Sarasvati Bhavana Library. (Nyāya-Vaiśeṣika ms. no. 341). He has commented on *Dīdhiti* and *Āloka*. His views have been reviewed by Yaśovijaya Gaṇi, the Jaina scholar, in his *Nyāya-khaṇḍa-khādya*.

Mathurānātha Tarkavāgīśa

Of all the commentators the most outstanding is Mathurānātha whose comm. on the three sections of *pratyakṣa*, *anumāna* and *śabda*, known as *Māthurī* or *Rahasya* have been published from the Asiatic Society, Calcutta.[67] It is a voluminous text that explains the original in detail to the satisfaction of scholars. It may be noted that *Rahasya* on *īśvara-vāda*, *jātiśakti-vāda* and the rest is yet to be discovered. His *Upamiti-rahasya* also is not available in print. Mathurānātha, like Śiromaṇi, is a prolific writer of great eminence. He has written *Dīdhiti* and *Āloka*, as also on Udayana's *Kiraṇāvalī* and *Ātma-tattva-viveka*. His comm. on *Līlāvati* and Vardhamāna's *Prakāśa* are yet to be published. It may be mentioned that Mathurānātha's stature in the field of Navya-Nyāya is yet to be ascertained. The voluminous literature produced by him rich in investigations so subtle and hair-splitting and full of references to the views of his predecessors is unquestionably bewildering.

---

66. *Adhikañ ca Śabdamaṇisāramañjaryāṁ vivecitam asmābhiḥ* / (ms. with Prof. D. Bhattacharya (251/2).

67. *Pratyakṣa-khaṇḍa* upto *sannikarṣa-vāda* (1888), *Anumāna-khaṇḍa* upto *bādha* (1892) and *Śabda-khaṇḍa* in two parts (1897 & 1901).

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

Jagadīśa Tarkālaṅkāra

A junior contemporary of Mathurānātha is Jagadiśa. His com. on *TC* is known as *Mayūkha*. His com. on *MV* as also a few folios of sections on *upamāna* and *śabda* are now available. A substantial portion of *Mayūkha* on *anumāna* has been published by us in the Sanskrit Sahitya Parishad Series, Calcutta. It is not known whether he has written on *Āloka*. One of his most popular works is *Śabda-śakti-prakāśikā*.

Gadādhara Bhaṭṭācārya

The glorious chapter of Navya-Nyāya ends with Gadādhara. His comm. on *Dīdhiti* and *Āloka* are popular texts. We are told that he has written on *anumāna* and *śabda* sections of *TC*, but they are not available to us. The present-day scholars of Navya-Nyāya of the traditional school are found to be very much interested in his writings.

C. VĀRĀṆASĪ SCHOOL

Pragalbha Ācārya

Our account of Navya-Nyāya literature would hardly be deemed complete without a reference to yet another school of Navya-Nyāya that grew and developed in Vārāṇasī. One of the earliest exponents of Navya-Nyaya in that part of our country is Pragalbha.

Pragalbha has written comm. on the four sections of *TC* as also on *MV* (published from Vārāṇasī) and it is believed that he is a senior contemporary of Sārvabhauma who criticises his view in the *vyadhikaraṇa* section of his *Anumāna-maṇi-parīkṣā*. This we presume on a statement of Raghunātha Vidyālaṅkāra.[68] Pragalbha's date may be fixed sometime between the first quarter of the fifteenth century and the end

68. *Sārvabhaumasya ca Pragalbhamatadūṣaṇaṁ sādhyābhāvapadavaiyarthyam/Pratibimba* 79/2.

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

of it. He is believed to have been a formidable rival of Pakṣadhara and may have preceded the latter. He is the only great *ācārya* who is known to have commented on the *upamāna* section of *TC* which has been recently published by us. His com. on *īśvara-vāda* forms a quarter of the entire work. Pragalbha's com. on the different sections on Vardhamāna's *Prakāśa*, on Udayana's *Kiraṇāvalī*, as also a com. on *Nyāya-līlāvatī* known as *Līlāvatī-pragalbhī* are important works.

Pragalbha is known to have flourished in Vārāṇasī and it is because of him that the literature of *TC* has become popular in that part. Pragalbha hails from Bengal. He does not belong to Mithilā as mentioned by Vindyeśvarīprasāda.[69] He is a Vārendra Brahmin. He mentions Narapati Miśra as his father and Jāhnavī as his mother in the opening verse of *Pratyakṣa-pragalbhī*.[70] It appears that he has received his lessons from his father.[71] His another name is Śubhaṅkara.[72] It is worthy of notice that he mentions the names of his distinguished teachers, Divākara and Jagadguru. Pragalbha is also a reputed teacher of Vedānta being the disciple of Anubhavānanda.[73]

Padmanābha Miśra

Padmanābha Miśra, yet another Bengalee, hails from Vārāṇasī and his comm. *Setu* on *Vaiśeṣika-bhāṣya*, *Nyāya-kandalī-sāra* on Śrīdhara's work, *Vardhamānendu* on Vardha-

69. *Pragalbhamiśrādibhir Maithilapaṇḍitaiḥ.*
70. *Ācārya-Śrī-Pragalbhena Jāhnavīgarbhasambhuvā | Pitur Narapater vyākhyāṁ hṛdi kṛtvā nibadhyate ||.*
71. *Dhyātvā pitur Narapateś caraṇadvayañ ca Śrīmat-Pragalbha iha kīñcid ahaṁ bravīmi ||.*
72. *Kevalānvayi-Govindaṁ praṇamya Śrī-Śubhaṅkaraḥ ||* Section on *kevalānvayī*.
73. *Śrī-Jñānānanda bhagavatpūn jyapādaśiṣya-Śrīmad-Anubhavānandabhagavat-pūjyapādaśiṣyasya Srī-Pragalbhācāryasya kṛtau Khaṇḍanadarpaṇe |* Sanskrit College, Calcutta ms., 21/2.

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

māna's *Dravya-kiraṇāvalī-prakāśa* are well-known works. It is worthy of notice that he has written on *TC.*[74] Padmanābha's reputation as a Naiyāyika is of no mean order.

CONCLUDING REMARKS

A galaxy of intellectuals in Navya-Nyāya hails from Vārāṇasī among whom mention may be made of Śrimān Bhaṭṭācārya, Balabhadra Miśra, Rāmakṛṣṇa Bhaṭṭācārya-Cakravartin, Raghunātha Vidyālaṅkāra, Rudra Nyāyavācaspati, Viśvanātha Siddhānta-pañcānana, Gaurīkānta Sārvabhauma, Raghudeva Nyāyālaṅkāra, Jayarāma Nyāya-pañcānana, Rāmacandra Siddhāntavāgīśa and others. But, it has to be admitted that they seem to be far removed from Gaṅgeśa. They are all more proximate to Śiromaṇi and have been influenced by his writings. Needless to mention that Pragalbha and Padmanābha are the two most outstanding Naiyāyikas of this school who have written on *TC.*

REFERENCES

Chakravarty, Manomohan	JSAB, 1915
Kaviraj, MM Gopinath	Sarasvati Bhavana Studies III-V
Tarkavāgīśa, MM Phanibhusana	Introduction to Nyāya-paricaya
Bhattacharya, Dineshchandra	Vāṅgālir Sārasvata Avadāna, I

74. *Pṛatyakṣa-maṇi-parīkṣā*, 8 leaves only preserved in the Asiatic Society Calcutta; *Anumāna-maṇi-parīkṣā* not yet discovered; *Setu* refers to *Śabda-parīkṣā* (cp. *vistaraś cā' sya Śabdaparīkṣādau*, p. 389).

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उपोद्घातः

प्रामाण्यवादे प्रथमविप्रतिपत्तिविवरणम्

यद्यपि काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकमिति प्राचीनवचनात् न्याय-वैशेषिकसूत्रतद्भाष्यवार्त्तिकादीनां सकलशास्त्रार्थज्ञानोपयिकत्वं वृद्धैः कण्ठरवेणोक्तमेव तथापि तत्त्वचिन्तामणितद्व्याख्यानोपव्याख्यानैः प्रमाणप्रमेयादिपदार्थतत्त्वानि सम्भावितसकलविकल्पपरीक्षणपूर्वकं न्यायसिद्धान्तव्यवस्थापनेन विशदीकृतानि पठितॄणां मनांस्याह्लादयन्ति ।

तत्रापि प्रामाण्यवादो गहनः । अत एव "नमः प्रामाण्यवादाय मत्कवित्वापहारिणे" इति कस्यचित् मन्दप्रज्ञस्योद्गारः । प्रामाण्यं स्वत उत्पद्यते स्वतो ज्ञायते च, अप्रामाण्यन्तु परत एवोत्पद्यते परत एव च ज्ञायत इति मीमांसकाः । प्रामाण्यं परत एवोत्पद्यते परत एव च ज्ञायत इति तु नैयायिकाः । अयं विवादः कथमित्र समजनि इति चेत्, उच्यते । मीमांसकाः ईश्वरानङ्गीकारात्, अङ्गीकारेऽपि तस्य वेदविषये स्वातन्त्र्यानङ्गीकाराद् वेदः अपौरुषेयो भ्रमप्रमादविप्रलिप्साकरणापाटवाद्यप्रामाण्यकारणविरहेण स्वत एव प्रमाणमिति व्यवस्थापयन्, य एव लौकिकाः शब्दास्त एव वैदिकास्त एव च तेषामर्था इति स्वीकाराद् वेदवाक्यानां स्वतःप्रामाण्याङ्गीकरणाय लोकेऽपि पौरुषवाक्यानां स्वतःप्रामाण्यमातिष्ठन्ते ।

नैयायिकास्तु वेदा ईश्वरोच्चरितत्वेन आप्तवाक्यत्वात् प्रमाणानि इति स्वीकुर्वन्ति । ईश्वरस्तु न वेदादेव सिद्ध्यति ईश्वराद्वेदप्रामाण्यं वेदादीश्वरसिद्धिरिति परस्पराश्रयापत्तेः । परन्तु ईश्वरः; क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वाद् घटवदित्यनुमानेन; सिद्ध्यति इत्युपगम्य तत्प्रणीतत्वेन वेदप्रामाण्यमुररीचक्रुः । तथा च वेदस्य ईश्वरवचनत्वात् प्रामाण्यम् । मीमांसकास्तु त्रिविधाः भाट्टाः, प्राभाकराः, मुरारिमिश्रानुयायिनश्चेति । यद्यप्येतेषु वेदस्य स्वतःप्रामाण्याभ्युपगमविषये न वैमत्यमस्ति तथापि ज्ञाने व्यवसायानुव्यवसायादिप्रकारभेदसद्भावाद् अनुगतं मतत्रयस्यापि उत्पत्तौ ज्ञप्तौ च स्वतःप्रामाण्यं निरुच्य सभासु तन्मतं पूर्वपक्षीकृत्योभयत्र परतस्त्वं व्यवस्थापनीयमिति निर्वचनभारः नैयायिकस्य शिरस्यापतितः, निर्वचनकुशला हि ते इति ।

तत्रोत्पत्तौ स्वतस्त्वं नाम ज्ञानसामान्यकारणातिरिक्तकारणाजन्यत्वं मीमांसकाभिमतम्, यथा चक्षुस्संयोगादिकं प्रत्यक्षस्य, परामर्शः अनुमितेः, सादृश्यज्ञानं उपमितेः, योग्यताज्ञानं शाब्दबोधस्येति । न्यायमते तु विशेषणवद्विशेष्यसन्निकर्षः प्रत्यक्षे,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

साध्यवति पक्षे परामर्शः अनुमितौ, यथार्थसादृश्यज्ञानयथार्थयोग्यताज्ञाने उपमितिशाब्द-बोधयोः इति भेदः। तथा च ज्ञानसामान्यकारणभिन्नविशेषकारणाङ्गीकारात्परतस्त्व-मुत्पत्तौ।

ज्ञप्तौ प्रामाण्यन्तु मीमांसकेषु। यथा, प्रामाण्यं हि तद्वति तत्प्रकारकत्वं, तच्च स्वतो गृह्यते। तत्रापि अनधिगताबाधितार्थकत्वं न विवादविषयः तस्य ज्ञानज्ञाने अभावात्। तद्वति तत्प्रकारकत्वं यस्य ज्ञानस्योपेयते तज्ज्ञानविषयकज्ञाने तज्ज्ञान-प्रामाण्येन सह तज्ज्ञानं विषयीभवतीत्यर्थः।

तत्र प्राभाकरमते घटमहं जानामीत्येव प्राथमिकं ज्ञानं तत्र ज्ञानं ज्ञेयं ज्ञाता इति त्रयमेव विषयः, ज्ञाने वर्तमानं तद्वति तत्प्रकारकत्वमपि तत्र विषयः इति विवृण्वन्ति सर्वे। वस्तुतस्तु प्राभाकरमते ज्ञानं न स्वविषयकत्वेन स्वप्रकाशम् अपि तु स्वांशे संशयराहित्येन इति बृहतीऋजुविमलादयः[1]। अस्मिन्पक्षेऽपि प्राथमिकज्ञाने प्रमात्वं विषय एव स्वाश्रयज्ञानेन सह प्रकाशनात्। भाट्टमते शाबरभाष्योक्तदिशा ज्ञान-मनुमेयम्। तथा हि प्राथमिकेन अयं घट इति ज्ञानेन घटे ज्ञाततानामातिरिक्तः पदार्थं उत्पाद्यते। स च प्रत्यक्षः, तेन ज्ञानमनुमीयते। इयं ज्ञातता घटत्वप्रकारकघटविशेष्यक-ज्ञानजन्या घटवृत्तिघटत्वप्रकारकज्ञाततात्वात्, या यद्वृत्तियत्प्रकारकज्ञातता सा तत्प्रकारकज्ञानजन्या इति सामान्यमुखी व्याप्तिः। तज्जन्यज्ञानेन प्राथमिकज्ञानं तद्वृत्ति-प्रमात्वञ्च गृह्यते। मिश्रमते तु प्राथमिकस्य अयं घट इति ज्ञानस्य ग्राहकः अहं घटं जानामीत्यनुव्यवसायः, तेन ज्ञानं तद्वृत्तिप्रमात्वञ्च गृह्यते। सर्वेषु त्रिषु मतेष्वपि प्राथमिक-ज्ञानग्रहेषु प्राथमिकज्ञानवृत्तिप्रमात्वग्रहात् स्वतस्त्वसिद्धिः। न्यायमते तु प्राथमिक-ज्ञानग्रहोत्तरं मम पूर्वोत्पन्नं ज्ञानं प्रमा न वा इति संशयोत्पत्तेरनुभवाद् अनुव्यवसायेन प्रमात्वग्रहे तदनुपपत्तेः ज्ञानफललाभेनैव तद्धेतुभूतज्ञानप्रामाण्यग्रहः। यथा दूरे इदं जलमिति ज्ञानानन्तरं जलप्रदेशं गत्वा तत्र जललाभे सति मम पूर्वोत्पन्नं ज्ञानं प्रमा सफलप्रवृत्तिजनकत्वाद् इत्यनुमानेनैव प्रमात्वं गृह्यते। न्यायमते प्रमात्वस्योत्पत्तौ परतस्त्वं नाम विशेषकारणसहितेन ज्ञानसामान्यकारणेन प्रयोज्यत्वम्, ज्ञप्तौ परतस्त्वं नाम प्रामाण्याश्रयग्रहसामान्याविषयत्वे सति अनुमानादिजन्यग्रहविषयत्वमिति पर्य-वसितम्। मीमांसकत्रयसाधारणमुत्पत्तौ स्वतस्त्वन्तु ज्ञानसामान्यसामग्रीजन्यत्वमेव प्रयोज्यत्वं वा, ज्ञप्तौ तु प्रामाण्याश्रयज्ञानविषयकसकलज्ञानविषयत्वमेव।

तत्र मणिकारः आदौ ज्ञप्तौ परतस्त्वं सयुक्तिकं व्यवस्थाप्य पश्चादुत्पत्तौ परतस्त्वं व्यवस्थापयिष्यति। तत्र विप्रतिपत्तिः—ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकस्वाश्रयग्रा-

---

१. बृहती पाद-१ पृ ८२ एकसंवेद्यविषयैव हि एका संवित् न सा वेद्यद्वय-विषया। किमसंवेद्यैव संवित? न ब्रूमो न संवेद्या संविदिति संवित्तयैव हि संवित् संवेद्या न संवेद्यतया, नास्याः कर्मभावो विद्यत इति।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वज्ज्ञानग्राहकसामग्रीग्राह्यं न वेति । तत्र विधिकोटिः मीमांसकानां त्रयाणां निषेधकोटिः नैयायिकानाम् । अयं परिष्कारः मतत्रयसाधारणः, त्रिभिरपि प्रामाण्याश्रयज्ञानविषयकज्ञानेन ज्ञानस्य तद्गतप्रामाण्यस्य च ग्रहात् । उक्तपरिष्कार एवं विव्रियेत । अयं घट इति यथार्थज्ञाने घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वरूपं प्रामाण्यं विद्यते । तदाश्रयः तादृशघटज्ञानमेव, तद्विषयकग्रहः गुरुमते व्यवसाय एव, मिश्रमतेऽनुव्यवसायः, भट्टमते ज्ञाततालिङ्गकानुमितिः, तज्जनकसामग्रीजन्यग्रहः, स एव, तद्विषयत्वं प्रामाण्ये इति मतत्रयसाधारणम् । उक्तपरिष्कारे तदप्रामाण्याग्राहकत्वं यावत्त्व ज्ञानग्राहकत्वञ्च सामग्र्यां विशेषणम् । दृष्टान्ते अयं घट इति प्राथमिकज्ञाने यद् घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वं विद्यते स पक्षः, तज्ज्ञानं तद्विषयकं घटमहं जानामीति ज्ञानम्, तस्य सामग्री विषयीभूतज्ञानम् आत्ममनस्संयोगः इत्यादिघटिता सामग्री, तज्जन्यग्रहः अनुव्यवसायः, तद्विषयत्वं प्रामाण्ये ।

अत्र सामग्र्यां यावत्त्वानुपादाने सफलप्रवृत्तिजनकत्वादिलिङ्गकानुमानग्राह्यत्वस्य न्यायमतेऽपि स्वीकारात् सिद्धसाधनं, मीमांसकानां बाधश्च । अतः यावदिति । अनुव्यवसायसामग्र्या तदग्रहात् तद्व्यावृत्तिः । कदाचिद् अयं घट इति अयथार्थज्ञानानुव्यवसायः मम ज्ञानं अप्रमा इति यथार्थमेव जायेत तद्गतस्य अप्रामाण्यवति अप्रामाण्यप्रकारकत्वस्य पक्षीकरणे तद्ग्राहकसामग्र्या अप्रामाण्याग्राहकत्वाभावाद् बाधः, अतः तदिति । तस्मिन् ग्राह्यप्रामाण्याश्रये अप्रामाण्याग्राहकत्वमुक्तम् । अत्र प्रकृतसामग्री अनुव्यवसाये अप्रमायां अप्रामाण्यं गृह्णाति न तु व्यवसाये इति तादृशसामग्रीव्यावृत्तिरिति संक्षेपः । स्वतःप्रामाण्यपरिष्कारस्य अत्यन्तविस्तरेण दलकृत्यादिनिरूपणेन ग्रन्थकृता पण्डितलोकस्य महदुपकृतम् ।

प्रकृतग्रन्थस्वारस्यम्

आदौ अथ जगदेवेत्यत्राथशब्दस्यानन्तर्यार्थकत्वं स्वीकृत्य मङ्गलश्लोकेन देवताप्रणत्यनन्तरं प्रमाणतत्त्वमत्र विविच्यत इति व्याख्या । इतरेऽपि आलोककारादयो मङ्गलसफलत्वव्यवस्थापनानन्तर्यमथ इत्याहुः । यदि चैतस्यार्थस्य मङ्गलानन्तरं निवेशादेव लाभात् तत्कथनं निष्प्रयोजनमेवेति विभाव्यते तदा अथ योगानुशासनमित्यादिप्रयोगेष्विवारम्भार्थकत्वमेवास्त्विति समाहितम् । अस्मिन् पक्षे मङ्गलस्य न ग्रन्थान्तर्भावः पूर्वव्याख्या तु मङ्गलसप्रयोजनत्वव्यवस्थापनस्य आनन्तर्यप्रतियोगितयाऽन्वयात् तस्य ग्रन्थान्तर्भाव इति व्यज्यते । अष्टादशविद्यास्थानेष्वभ्यर्हिततमत्वं कथमान्वीक्षिक्या इति प्रश्ने आन्वीक्षिकीप्रतिपादितप्रमाणतर्काभ्यामेव तत्तद्विद्यास्थानानि स्वस्वप्रतिपाद्यं प्रतिपादयन्ति इत्युपजीव्यत्वादिति समाधानमत्र श्रूयते ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सामग्र्यां यावत्त्वनिवेशपक्षे यावत्सामग्रीजन्यैकग्रहाप्रसिद्धिमुद्भाव्य परिहारः सामग्रीपदस्य तत्तत्कार्यव्यक्तिनिरूपितकारणसमुदायपरत्वादित्यादिकम् इतरग्रन्थेष्वनधिगतम् अस्मादेव ग्रन्थाज्ज्ञायत इति शम् ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

विषयसूची

क्र० सं०	विषयाः	पृ० सं०
१.	मूलोपोद्घातः	१
२.	प्रभामङ्गलाचरणम्	१
३.	प्रभानिर्माणकालः	१
४.	एतद्ग्रन्थाध्ययनप्रवर्त्तकानुबन्धचतुष्टयनिरूपणम्	१
५.	न्यायसूत्रनिर्देशपूर्वकं शास्त्रस्य निःश्रेयसफलकत्वनिरूपणम्	१
६.	प्रमाणतत्त्वस्य शास्त्रप्रकरणत्वनिरूपणम्	२
७.	शास्त्राध्ययनप्रवृत्तिप्रयोजनकैतद्ग्रन्थाभिधेयनिरूपणम्	२
८.	अनुबन्धचतुष्टयान्तर्गतसम्बन्धनिरूपणम्	२
९.	प्रमाणतत्त्वनिरूपणप्रतिज्ञाप्रदर्शनम्	२
१०.	प्रतिज्ञायाः स्वरूपं लक्षणं तत्समीक्षा च	२
११.	प्रमेयतत्त्वानि विहाय प्रमाणतत्त्वव्याख्यानप्रयोजनप्रदर्शनम्	२
१२.	मूलग्रन्थावतरणव्याख्यानम्	२
१३.	चिन्तामणिवाक्यशाब्दप्रदर्शनम्	३
१४.	मथुरानाथदिशोपोद्घातवाक्यविवरणम्	५
१५.	मथुरानाथव्याख्यानपरीक्षणम्	६
१६.	विष्णुपुराणदिशा अष्टादशविद्यानिरूपणम्	६
१७.	कौटिल्यभरतवाक्यादिदृष्ट्या विद्यायाश्चातुर्विध्यनिरूपणम्	७
१८.	आन्वीक्षिक्या अभ्यर्हिततमत्वव्यवस्थापनम्	७-८
१९.	आन्वीक्षिकीशब्दार्थप्रतिपादनम्	८
२०.	परमकारुणिकशब्दार्थविश्लेषणम्	९
२१.	तत्प्रसङ्गायत्तकरुणाया वैविध्यनिरूपणपूर्वकं तत्स्वरूपव्यवस्थापनम्	९
२२.	तत्त्वज्ञानपरीक्षणम्	१०
२३.	षोडशपदार्थनिरूपणम्	१०
२४.	प्रमाणतत्त्वविवेचनप्रतिज्ञा (मू०)	११
२५.	विषयाधिकारिसम्बन्धप्रयोजनोपसंहारः	११
२६.	प्रमाणप्राशस्त्यनिरूपणम्	११
२७.	प्रमाणतत्त्वस्य स्वतस्त्वपरतस्त्वविप्रतिपत्तिनिरूपणम्	१२

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

क्र० सं०	विषयाः	पृ० सं०
२८.	भाष्यसिद्धान्तरीत्या प्रमाणप्राधान्यनिरूपणम्	१२
२९.	प्रमाणतत्त्वाध्यवसायासम्भवत्वनिरूपणम्	१३
३०.	प्रामाण्यज्ञानस्य प्रवृत्तिं प्रति व्यभिचारप्रकाशनम् (मू०)	१४
३१.	मूलवाक्यविवरणम्	१४-१५
३२.	प्रकारान्तरेणेष्टसाधनताज्ञानधर्मिकप्रामाण्यावधारणस्य प्रवृत्तौ कारणत्वव्यवस्थापनशङ्कानिरूपणम्	१६
३३.	नियमग्राहकदृष्टान्तनिरूपणम्	१६
३४.	षष्ठ्या अर्थद्वयकल्पनानिरासः	१७
३५.	मिश्रठक्कुरमथुरानाथदिशा प्रवृत्तिपदार्थनिरूपणम्	१७
३६.	मूलग्रन्थस्थनियमस्वरूपविवरणम्	१७-१९
३७.	तत्र दीधितिकृन्मतप्रदर्शनम्	१९
३८.	व्याप्तिग्रहोपायस्थमणिवाक्येन दीधितिग्रन्थस्य विरोधप्रदर्शनम्, तत्समाधाननिरूपणञ्च	२०-२१
३९.	अर्थनिश्चयादेवाप्रवृत्तिं प्रतिपाद्य सन्देहस्य प्रवृत्तिं प्रति अप्रतिबन्धकत्वप्रदर्शनपूर्वकं खण्डनम् (मू०)	२१
४०.	प्रकृतमूलव्याख्यानम्	२२
४१.	पूर्वोक्तखण्डने युक्तिप्रदर्शनम् (मू०)	२३
४२.	प्रदर्शितयुक्तेः प्रभायां विवरणम्	२३-२४
४३.	मीमांसकदृष्ट्या प्रामाण्यस्य स्वतस्त्वप्रतिपादनम् (मू०)	२५
४४.	प्रभायां स्वतस्त्वव्याख्यानम्	२५
४५.	विभिन्नदार्शनिकसिद्धान्तस्वरूपनिरूपणपूर्वकं ज्ञानस्य स्वयं प्रकाशत्वे दार्शनिकानां युक्तीनां निरूपणम्	२६-२८
४६.	प्रामाण्यस्य स्वतःप्रकाशत्वे विप्रतिपत्तिवाक्यप्रतिपादनम् (मू०)	२८
४७.	विप्रतिपत्तिवाक्यस्य विविधाचार्यमतप्रदर्शनपूर्वकं विवरणम्	२९-३६
४८.	विप्रतिपत्तिवाक्यघटकतदप्रामाण्यग्राहकपदविमर्शः	३६-४०

❀ ❀ ❀

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

मङ्गलश्लोकाः

गुणातीतोऽपीशस्त्रिगुणसचिवस्त्र्यक्षरमय-
स्त्रिमूर्तिर्यः सर्गस्थितिविलयकर्माणि तनुते ।
कृपापारावारः परमगतिरेकस्त्रिजगतां
नमस्तस्मै कस्मैचिदमितमहिम्ने पुरभिदे ॥

प्रारिप्सितस्य तत्त्वचिन्तामणिग्रन्थस्य निर्विघ्नपरिसमाप्तिमभीप्सुर्ग्रन्थकारो मङ्गलमाचरञ्छिष्यशिक्षार्थं ग्रन्थादौ तन्निबध्नाति 'गुणातीत' इत्यादि। अत्र च प्रथमान्तयत्पदार्थेऽन्येषां प्रथमान्तपदोपस्थाप्यार्थानां तादात्म्येनान्वयो बोध्यः। शास्त्रे खलु यत्पदस्य द्विधा प्रयोगो दृश्यते। कुत्रचित् प्रक्रान्तार्थपरामर्शकत्वेन कुत्रचिच्च प्रक्रम्यमाणार्थपरामर्शकत्वेन यत्पदस्य प्रयोगो भवति। यादृशस्थले यत्पदं स्वपूर्ववर्तिपदोपस्थापितमर्थं स्वप्रयोक्तृबुद्धिविषयतावच्छेदकत्वेनोपलक्षितधर्मवत्तया स्वार्थमुपस्थापयति तत्रत्यं यत्पदं प्रक्रान्तार्थपरामर्शकं यादृशस्थले च स्वपूर्ववर्तिपदानुपस्थापितमर्थं तत्पदप्रतिपाद्यतया स्वप्रयोक्तृबुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मवत्त्वेन स्वार्थं समर्पयति, तत्रत्यन्तु यत्पदं प्रक्रम्यमाणार्थपरामर्शकं भवति। एवं यत्पदमिव तत्पदमपि प्रक्रान्तार्थपरामर्शकत्वेन प्रक्रम्यमाणार्थपरामर्शकत्वेन वा शास्त्रे द्विधैव प्रयुक्तं भवति। 'यं सर्वशैलाः परिकल्प्य वत्समि'त्यादिकुमारसम्भवश्लोकस्थं यत्पदं प्रक्रान्तपरामर्शकम्। 'अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराज' इत्यादिपूर्वश्लोकस्थहिमालयपदप्रतिपाद्यस्यैव प्रालेयानलत्वावच्छिन्नस्य तेन समुपस्थापनात्। अत्रत्ययत्पदस्य प्रदर्शितदिशा प्रक्रान्तार्थोपस्थापकत्वादेव तत्पदप्रयोगसापेक्षप्रयोगविषयत्वमपि नास्ति। 'यं ब्रह्मा वरुणेन्द्ररुद्रमरुतस्स्तुन्वन्ति दिव्यैः स्तवै'रित्यादिश्लोकस्थं यत्पदं प्रक्रम्यमाणपरामर्शकम्। तत्र यत्पदपूर्ववर्तिनः साकाङ्क्षस्य कस्यापि पदान्तरस्याभावात्तेनार्थविशेषस्योपस्थापनासम्भवात्। अत्र च श्रुततत्पदजन्यार्थोपस्थापनात् पूर्वमपि व्युत्पन्नपुरुषाणां वक्तृपुरुषीयत्वेन स्वकल्पिततत्पदस्य ईश्वरस्तत्पदजन्यबोधविषयतावान् भवत्वित्याकारकवक्तृतात्पर्यस्य प्रकरणादिना ग्रहणसम्भवात् तत्कारणत्वेन च तत्पदजन्यबोधविषयतावान् ईश्वरो मदिष्टसाधनमित्याकारकस्य वक्तृज्ञानस्य च कल्पनासम्भवेन तत्पदजन्यबोधविषयत्वप्रकारतानिरूपितविशेष्यतावच्छेदकत्वोपलक्षितेश्वरत्वावच्छिन्ने तत्पदस्य सङ्केतग्रहः सम्भवति।

'यं ब्रह्मे'त्यादिस्थल इव प्रकृतस्थलेऽपि यत्पदं प्रक्रम्यमाणार्थपरामर्शकमेव। अतोऽत्रापि तत्पदप्रतिपाद्यतया वक्तृबुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने एव

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यत्पदस्य सङ्केतो बोध्यः। प्रकरणादिना च तत्पदस्य नित्यज्ञानवतांस्तत्पदजन्य-बोधविषयो भवत्वित्याकारकं तात्पर्यमस्माभिर्ज्ञातुं शक्यम्। प्रोक्ततात्पर्यस्य कारणीभूतं वक्तृनिष्ठं तत्पदजन्यबोधविषयो नित्यज्ञानवान् मदिष्टसाधनमित्याकारकमिष्ट-साधनताज्ञानमप्यस्माभिरनुमातुं शक्यम्। तथा च प्रकृते तत्पदजन्यबोधविषयस्व-प्रकारतानिरूपितविशेष्यतावच्छेदकत्वस्य नित्यज्ञानवत्त्वे सत्त्वात्तादृशधर्मवतोऽश्वरे यत्पदसङ्केतोऽस्माभिर्ग्रहीतुं शक्य एव। 'त्रिगुणसचिव' पदेन परमेश्वरे गुणत्वप्रकारेण नित्यज्ञानवत्त्वस्यार्थतो लाभेऽपि तेन नित्यज्ञानत्वेन रूपेण नित्यज्ञानवत्त्वस्यालाभान्न यत्पदेन तस्य पुनरुक्तत्वमाशङ्कनीयम्। अत्र च तत्पदार्थस्यैव नित्यज्ञानवतो विशेष्य-त्वादन्येषां प्रथमान्तपदोपस्थाप्यानामर्थानां तत्रैव तादात्म्येन विशेषणतयान्वयो बोध्यः।

स नित्यज्ञानवान् किम्भूत इत्याकाङ्क्षायामाह 'गुणातीत' इत्यादि। साङ्ख्यमतानुसारेण गुणपदं द्रव्यात्मकेषु सत्त्वरजस्तमःसु परिभाषया प्रवर्तते। अतीतत्वञ्चात्र भेदवत्त्वरूपं ग्राह्यम्। तथा च गुणातीतत्वमित्यत्र गुणत्वेन सत्त्वरजस्तम-सामन्यतमत्वात्मकेन रूपेण गुणभेदवत्त्वरूपं बोध्यम्। ईशत्वञ्चाप्रतिहतेच्छावत्त्वम्। गुणातीतस्येशत्वकथनं साङ्ख्यमतानुसारेण विरोधसूचनाय। तथा हि तन्मते सत्त्वगुण-प्रधानस्यान्तःकरणस्याहङ्कारपरिणामभूतस्य ज्ञानेच्छादिपरिणामित्वात्तदेव तेषां ज्ञानेच्छादीनामधिकरणं न तु गुणभिन्नश्चिदात्मकः पुरुषः। एवञ्च गुणभेदवत्त्वेन सहेच्छावत्त्वस्य सामानाधिकरण्यवैधुर्ये नियमसत्त्वात्तन्मतानुसारेणात्र विरोधः सूचितः। न्यायमतानुसारेण च गुणभिन्नत्वेन सहेच्छावत्त्वस्य विरोधाभावात् तदाभासात्म-कोऽलङ्कारः प्रतिपादित.। न्यायमते च रूपादिशब्दान्ताश्चतुर्विंशतिपदार्था गुणत्वेन गृहीताः सन्ति। तद्भिन्नानामेव क्षित्यादिनवविधद्रव्याणां गुणाश्रयत्वमभ्युपगतमिति गुणभिन्नस्यापि परमात्मन इच्छादिधर्मवत्त्वे विरोधाभावाद्विरोधाभासनामकोऽत्रा-लङ्कारो 'गुणातीतोऽधीश' इत्यनेन ग्रन्थकृता प्रतिपादित इति भावः।

मथुरानाथादयस्तु 'गुणातीतोऽपीश' इति ग्रन्थांशव्याख्यायां न्यायमतानुसारेण विरोधं प्रदर्श्य साङ्ख्यसम्मतगुणपदार्थस्थाने न्यायमतानुसारेणादृष्टं कल्पयित्वा तं परिहरन्तोऽलङ्कारं प्रतिपादयाम्बभूवुः। तथा हि समवायसम्बन्धावच्छिन्नगुणत्वा-वच्छिन्नप्रतियोगितानिरूपकगुणसामान्याभाववत्त्वमेवात्र तन्मते गुणातीतत्वं बोध्यम्। ईशत्वञ्चाप्रतिहतेच्छावत्त्वं प्रोक्तगुणसामान्याभावेन सहेच्छावत्त्वस्य नियतासामानाधि-करण्यादत्र न्यायमतानुसारेण विरोधो लभ्यते। अत्र गुणपदस्य साङ्ख्यसम्मतगुण-परत्वात्तादृशगुणाभावस्याधिकरणे आत्मनीच्छादिसमवायित्वस्य नैयायिकैः स्वीकारा-द्विरोधस्य परिहारो बोध्यः। न च न्यायमतेन साङ्ख्यसम्मतगुणपदार्थस्यालीकत्वात्तत्-प्रतियोगिकोऽभावो न नैयायिकानां सम्मतोऽलीकप्रतियोगिकाभावस्य स्वमतेऽपसिद्धान्त-त्वादिति वाच्यम्। साङ्ख्यसम्मतगुणपदार्थस्थाने नैयायिकैरदृष्टस्य कल्पयितव्यत्वेन

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तादृशाभावस्यालीकप्रतियोगिकत्वाभावादिति तेषामभिप्रायः। एतच्च नास्मभ्यं रोचते। यदि साङ्ख्यसम्मतगुणपदार्थमवलम्ब्य विरोधः परिहरणीयस्तदा तन्मतानुसारेणैव गुणसामान्याभावेन सह तन्मतानुसारेणेशत्वस्याविरोधोऽवश्यं प्रतिपादनीयः। स च प्रकृते न सम्भवति सामान्यतो गुणसमवायित्वाभाववति पुरुषे इच्छावत्त्वस्यानभ्युपगमादिच्छाया अपि तन्मते गुणात्मकत्वात्तद्वत्यन्तःकरणे सामान्यतो गुणसमवायित्वाभावानभ्युपगन्तव्यत्वात्। तथा च न साङ्ख्यमतानुसारेण गुणातीतत्वेन सहेच्छावत्त्वस्य कथमप्यविरोधः सम्भवति। नैयायिकाः साङ्ख्यीयसङ्केतानुसारेण गुणपदस्यार्थं स्वीकृत्य तत्स्थानेऽदृष्टं प्रकल्प्य तदभावेन सहेशत्वस्य स्वमतेनाविरोधमनुभवेयुरित्यत्यन्तं विसदृशं वचनम्। साङ्ख्यमतेन गुणानामुपादानत्वान्न्यायमते चादृष्टस्य निमित्तकारणमात्रात्मकत्वात्तत्स्थाने नैयायिकानामदृष्टकल्पनायाः सर्वथाऽसम्भवात्। तदर्थक्रियारहितानामपि तत्स्थानापन्नत्वे यस्य कस्यापि पदार्थस्य सर्वपदार्थस्थानापन्नत्वापत्तेर्वज्रलेपत्वात्। साङ्ख्यसम्मतगुणपदार्थस्थाने नैयायिकैः कोऽपि पदार्थः कल्पनीय इत्यप्यसमीचीनमेव प्रतिभाति। साङ्ख्यसम्मतपुरुषस्येव प्रकृतेरपि न्यायमतेऽलीकत्वात्। अलीकपदार्थस्थानेऽपि कस्यापि पदार्थस्यावश्यं कल्पनीयत्वे शशशृङ्गादिस्थानेऽपि नैयायिकानां पदार्थविशेषकल्पनापत्तिर्दुर्निवारा स्यात्। अपि च प्रथमं गुणसामान्याभावेन सह प्रदर्शितस्य विरोधस्य पश्चाद् गुणविशेषाभावेनाभासत्वप्रतिपादने सौन्दर्यहान्या पूर्वोपस्थापितविरोधस्य तेन रूपेणाभासत्वप्रतिपादन एव विरोधाभासस्य शोभावर्धकत्वेनालङ्कारत्वसम्भवात्।

'त्रिगुणसचिव' इति। अत्र सङ्ख्यावोधकं त्रिपदं यदि नित्यज्ञानेच्छाकृतिपर्याप्तां त्रित्वसङ्ख्यां समुपस्थापयेत्तदार्थसङ्कोचेन तल्लाक्षणिकं स्यात्। सामान्यवाचकपदस्य विशिष्टार्थोपस्थापकत्वे शास्त्रकृद्भिर्लक्षणायाः स्वीकारात्। एवं सति त्रयश्च ते गुणाश्चेति विग्रहे त्रिगुणाः इति पदं कर्मधारयसमास एव निष्पन्नं भवेत्। सङ्ख्याबोधकपदपूर्वकत्वेऽपि तत्पदस्य लाक्षणिकत्वे द्विगुत्वासम्भवात्। लाक्षणिकान्यसङ्ख्याबोधकपदपूर्वकस्यैव प्रथमासमानाधिकरणसमासस्य द्विगुत्वाङ्गीकाराज्जगदीशतर्कालङ्कारेण शब्दशक्तिप्रकाशिकायां प्रदर्शितप्रणाल्यैव तस्य निर्वचनात्। यदि चात्र त्रिपदं सामान्यतस्त्रित्वावच्छिन्नस्योपस्थापकं तदा तस्य लाक्षणिकान्यत्वेन द्विगुसमासादेव त्रिगुणमिति पदं निष्पन्नमिति ज्ञेयम्। कर्मधारयपक्षे त्रिगुणानां सचिव इति षष्ठीवहुवचनान्तविग्रहे द्विगुपक्षे च त्रिगुणस्य सचिव इति षष्ठ्येकवचनान्तविग्रहे त्रिगुणसचिवपदं षष्ठीसमासेन व्युत्पन्नं स्यात्। साचिव्यञ्चात्र सहकारित्वमेव पूर्वसूरिभिस्तस्य ताद्रूप्येण प्रतिपादनात्। तत्सहकारित्वञ्च तदसमवधानप्रयुक्तफलाभाववत्त्वावच्छिन्नसामान्यकत्वरूपं बोध्यम्। सव्यभिचारदीधितिव्याख्यायां भट्टाचार्येण तस्य तथैव परिष्करणात्। फलपदञ्च नित्यावृत्तित्वोपलक्षितधर्मावच्छिन्ने पारिभाषिकम्। अत्र च तादृशावृत्तित्वोपलक्षित-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कार्यत्वेन रूपेण सर्वेषामेवोत्पन्नपदार्थानां वोधकम् । कार्यमात्रं प्रत्येव नित्यज्ञानादीनामीश्वरस्य च कारणत्वाभ्युपगमात् । कार्यकारणभावश्च कालिकसम्बन्धेन ग्राह्यः । कालिकसम्बन्धेन कार्यत्वावच्छिन्नं प्रति कालिकसम्बन्धेन नित्यज्ञानादीनामीश्वरस्य चान्वयव्यतिरेकसम्भवात् । कालिकसम्बन्धावच्छिन्ननित्यज्ञानत्वाद्यवच्छिन्नप्रतियोगिताकानां नित्यज्ञानाद्यभावानां परमाण्वाकाशादिनित्यद्रव्येषु सत्त्वात्तत्र च कालिकसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नप्रतियोगिताककार्यसामान्याभावस्य वर्त्तमानत्वात्तादृशकार्याभावं प्रति तादृशनित्यज्ञानाद्यभावानां प्रयोजकत्वमिति नित्यज्ञानाद्यभावप्रयुक्तकार्याभावकत्वस्येश्वरे सत्त्वात्तस्य नित्यज्ञानादिसहकारित्वं निर्वाधम् ।

ननु कालिकसम्बन्धावच्छिन्ननित्यज्ञानत्वाद्यवच्छिन्नप्रतियोगिताकाभावस्य तादृशसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नप्रतियोगिताकाभावस्य च द्वयोः परमाण्वाकाशादिषु नित्यवस्तुषु विद्यमानत्वेऽपि न तादृशकार्यसामान्यभावं प्रति तादृशनित्यज्ञानाद्यभावानां प्रयोजकत्वं तादृशाभावस्य नित्यवस्तुवृत्तित्वं प्रति कालानुपाधित्वप्रयोजकनित्यत्वस्यैव प्रयोजकत्वादिति चेन्न । कार्यतावच्छेदकसम्बन्धावच्छिन्नकारणतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावस्य व्याप्यत्वेन तादृशकारणाभावे तादृशकार्याभावज्ञापकत्वरूपप्रयोजकत्वस्य वर्जयितुमशक्यत्वादिति सर्वं चतुरस्रम् ।

यद्वा त्रयो ज्ञानेच्छाप्रयत्नरूपा गुणा येषामिति विग्रहे बहुव्रीहिसमासेन निष्पन्नं त्रिगुणेतिपदं स्ववृत्तिगुणसम्बन्धित्वेन रूपेण जीवजातमुपस्थापयति । अनन्तरञ्च त्रिगुणानां सचिव इति विग्रहे षष्ठीसमासेन त्रिगुणसचिवेतिपदस्य निष्पत्तिर्बोध्या । साचिव्यमत्र कर्मफलादातृत्वरूपमेव ग्राह्यम् । एवञ्च साचिव्यैकदेशकर्मणि षष्ठ्यर्थनिष्ठत्वस्यान्वयात् त्रिगुणसचिवेतिपदं स्ववृत्तिगुणसम्बन्धनिष्ठं यत् कर्म तज्जन्यफलदातृत्वेन रूपेणेश्वरमुपस्थापयतीति वोध्यम् । ईश्वरस्य कर्मफलदातृत्वञ्च सूत्रादिषु प्रसिद्धमेवास्ते । यद्यपि स्ववृत्तिज्ञानात्मकगुणसम्बन्धित्वेनैव जडव्यावृत्त्या जीवानामुपस्थापनं सम्भवतीति तदर्थं त्रिपदसमभिव्याहृतगुणपदेनेच्छाकृत्योर्ग्रहणमनावश्यकमिति सत्यम् । ज्ञानेच्छाकृतीनां परस्परं सामानाधिकरण्यसूचनाय त्रिपदेन तयोरपि ग्रहणं सप्रयोजनमेव । साङ्ख्यमते च ज्ञानेच्छाकृतीनां द्रव्यात्मकान्तःकरणपरिणामत्वेन द्रव्यात्मकतया तद्व्यावृत्त्यर्थं न्यायमतेन तासां गुणत्वकीर्तनमपि सप्रयोजनमेवेति हृदयम् ।

'त्र्यक्षरमय' इति । त्रयाणामक्षराणां समाहार इति व्युत्पत्तौ परिनिष्पन्नं त्र्यक्षरमिति पदमोङ्कारमुपस्थापयति । तदुत्तरञ्च तस्येदमित्यर्थे मयट्प्रत्ययात् त्र्यक्षरमयेति पदं व्युत्पन्नं भवति । तेन च ब्रह्मविष्णुमहेश्वराः समुपस्थाप्यन्ते । अकारोकारमकाराणां ब्रह्मत्वादिजातित्रयावच्छिन्नतत्तच्छरीरत्रयवत्त्वेन ब्रह्मविष्णुमहेश्वरेषु रूढित्वस्य शास्त्रकाराणां सम्मतत्वात् । अत्राक्षरपदस्य शक्तत्वेन ग्रहणे तेनाकारोकारमकाराणामिवान्येषामपि वर्णानां ग्रहणं सम्भवति, तस्य वर्णत्वावच्छिन्ने सङ्केतितत्वात् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

घटत्वेन रूपेण यां कामपि घटव्यक्तिं प्रतिपादयितुं प्रयुक्तस्यैव घटपदस्य शक्तत्वेन व्युत्पन्नैर्ग्रहणात् । प्रकृते च यस्य कस्यापि वर्णस्य ग्रहणे तात्पर्यव्याघातात् प्रकृतेऽक्षर-पदमकारोकारमकारगतान्यतमत्वेन रूपेण तद्वर्णत्रये लाक्षणिकमेव । सामान्यतोऽर्थो-पस्थापकपदस्य विशेषार्थपरत्वे लाक्षणिकत्वस्य देशिकसम्मतत्वात् । न चैवमक्षरपदादेव तादृशान्यतमत्वरूपेणाकारोकारमकाराणां वर्णत्रितयानां ग्रहणसम्भवे त्रिपदं निष्प्रयोज-नमिति वाच्यम् । अन्यतमत्वस्य प्रत्येकपर्याप्तत्वेन केवलस्याकारस्यापि तेनोपस्थापन-प्रसक्तेरनिवारणात् त्रित्वसङ्ख्याया एकस्यां व्यक्तावपर्याप्ततया त्रिपदसमभिव्याहारे केवलस्याकारादिवर्णस्योपस्थितेर्वारयितुमशक्यत्वात् । न चैवमप्यकारत्रयादिसमाहारस्य त्र्यक्षरपदार्थत्वे बाधकाभावेन तत्परिवर्जनासम्भव इति वाच्यम् । पङ्कजादिपदस्येव त्र्यक्षरपदस्य प्रणवत्वावच्छिन्ने योगरूढत्वेन सर्वसामञ्जस्यात् । अथैवमपि रूढ्या वृत्त्यैवोङ्कारोपस्थापनसम्भवेन योगवृत्तिरकिञ्चित्करीति चेन्न । प्रणवत्वस्य तान्त्रिकप्रणवादिसाधारणत्वेन तन्निरासार्थं वर्णत्रितयसमाहारात्मकयोगवृत्तेरप्या-वश्यकत्वात् ।

यदि गोप्रातिपदिकादन्यत्र तस्येदमित्यर्थे मयट्प्रत्ययस्यापाणिनीयत्वेन त्र्यक्षर-मयपदमोङ्कारवाच्यत्वेन रूपेणेश्वरमुपस्थापयितुं नालमिति मन्येत तदा प्रणवात्मक-त्र्यक्षरस्येश्वराधिकरणत्वविवक्षया 'तत्प्रकृतवचने मयडि'ति सूत्रेण मयट्प्रत्ययात् त्र्यक्षरमयपदस्य निष्पत्तिर्बोध्या गत्यन्तराभावात् । अविवक्षितधात्वर्थकस्याधिकरणल्यु-डन्तसूत्रस्थवचनपदस्य सामर्थ्यात् प्रस्तुतपदार्थाधिकरणत्वविवक्षायामपि नागेशभट्टेन मयट्प्रत्ययस्य साधुत्वप्रतिपादनात् । वाच्यवाचकत्वादिसम्बन्धानां न्यायमते वृत्त्यनि-यामकत्वेनाधाराधेयभावविरोधित्वेऽपि प्रकृते तादृशविरोधस्याविवक्षितत्वाद्वाच्यस्या-प्यर्थस्य पुरभिदः स्ववाचकप्रणवादिपदाधिकरणत्वं विवक्षावशान्नासम्भवदुक्तिकमिति ध्येयम् । यद्वा त्रीण्यक्षराणि यस्येति विग्रहे बहुव्रीहिसमासेन निष्पन्नात् त्र्यक्षरपदात्तत्-प्रकृतवचने मयडिति सूत्रेण स्वार्थे मयट्प्रत्ययेन त्र्यक्षरमय इति पदस्य परिनिष्पत्ति-र्बोध्या । तथा च स्वार्थिकत्वेन प्रत्ययार्थस्याविवक्षितत्वात् स्ववाचकाकाराद्यक्षरत्रितय-सम्बन्धित्वेन रूपेण त्र्यक्षरमयपदमीश्वरमुपस्थापयतीति सर्वं सुसमञ्जसम् ।

'त्रिमूर्ति'रिति । तिस्रो मूर्तयो यस्येति विग्रहे बहुव्रीहिसमासे परिनिष्पन्नं त्रिमूर्तिपदं स्वावच्छेदकशरीरत्रयसम्बन्धित्वेन रूपेणेश्वरमुपस्थापयति । अत्रान्त्यावय-वित्वविशिष्टचेष्टाश्रयत्वेन मूर्तिपदस्य शरीरमात्रबोधकत्वेऽपि तात्पर्यानुपपत्त्या त्रिपदस्य ब्रह्मादिशरीरत्रयमात्रपर्याप्तत्रित्वावच्छिन्ने लाक्षणिकत्वादनभिमतशरीराणां व्यावृत्ति-र्बोध्या ।

अथ प्रत्यक्षसिद्धत्वाज्जन्यज्ञानाद्यवच्छेदकत्वेन युक्तिसिद्धत्वाच्च जीवानां सशरीरत्वेऽपि भगवतस्तदप्रामाणिकमेव । अस्मदादीनामतीन्द्रियत्वेन भगवतः शरीरं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न प्रत्यक्षप्रमाणेन सिद्धं स्यात् नाप्यनुमानेन ज्ञानेच्छाकृतीनामीश्वरे विद्यमानत्वेऽपि तत्र तासां नित्यत्वाभ्युपगमेन तदवच्छेदकस्यानावश्यकतया लिङ्गाभावात्। सिद्धान्तविरोधादपि न न्यायनये भगवतः सशरीरत्वमङ्गीकरणीयं भवेत्। तथा हि सशरीरस्यैव कर्तुः प्रामाणिकत्वेन कर्तृत्वान्यथानुपपत्त्या यदि क्षित्यङ्कुरादिकर्तुः परमेश्वरस्य सशरीरत्वमभ्युपगन्तव्यं स्यात्तदा परमेश्वरशरीरस्य सकर्तृकत्वासम्भवेन तच्छरीरान्तर्भवि कार्यत्वस्य सकर्तृकत्वव्यभिचारित्वान्न कार्यत्वेन लिङ्गेन क्षित्यङ्कुरादेः सकर्तृकत्वं सिध्येदिति सिद्धान्तव्याघात इति चेन्न। पदपदार्थसङ्केतज्ञापकव्यवहारप्रवर्तनार्थं प्रयोज्यप्रयोजकवृद्धभावेन सृष्टादावीश्वरस्यापि स्वेच्छामात्रनिमित्तकशरीरग्रहणस्य पदसमयज्ञानान्यथानुपपत्त्यैव सिद्धत्वात् कुसुमाञ्जलावाचार्यैरपि तथैव प्रतिपादनाच्च। कर्तृत्वान्यथानुपपत्त्या सशरीरत्वाभ्युपगमे सिद्धान्तव्याघातेऽपि पदपदार्थसम्बन्धज्ञानान्यथानुपपत्त्या तत्स्वीकारे क्षतिविरहात्। अशरीरस्यापीश्वरस्योपादानविषयकनित्यापरोक्षज्ञानसमानाधिकरणतादृशचिकीर्षाविशिष्टनित्यप्रयत्नात्मककर्तृत्ववत्त्वेन स्वीयशरीरस्यापि स्वकर्तृकत्वसम्भवेन कार्यत्वस्य सकर्तृकत्वाव्यभिचारात्तेन लिङ्गेन क्षित्यङ्कुरादौ कर्तृजन्यत्वानुमाने दोषाभावादिति ध्येयम्। अधिकमग्रे ईश्वरानुमानसमीक्षायामनुसन्धातव्यम्।

'सर्गस्थितिविलयकर्माणी'ति। सर्गश्च स्थितिश्च विलयश्चेति विग्रहे इतरेतरद्वन्द्वादनन्तरं तद्रूपाणि कर्माणीति मध्यपदलोपिकर्मधारयसमासेन सर्गस्थितिविलयकर्माणीतिपदस्य निष्पत्तिर्बोध्या। सर्गश्च द्व्यणुकाद्यनुगुणपरमाणुगतस्पन्दनम्। भोगसम्पादकव्यापार एवात्र स्थितिः। विध्वंसानुकूलो व्यापारो विलयः। उत्पत्त्यनुकूलप्रयत्न एवात्र धात्वर्थः। कर्माणीति द्वितीयार्थवृत्तित्वस्य धात्वर्थतावच्छेदकोत्पत्त्यात्मककाले तादृशविशिष्टधात्वर्थान्वितस्याख्यातार्थाश्रयत्वस्य प्रथमान्तपदार्थेऽन्वयात् सर्गस्थितिविलयात्मकव्यापारवृत्त्युत्पत्त्यनुकूलप्रयत्नाश्रयो नित्यज्ञानवानिति शाब्दबोधो लभ्यते।

'कृपापारावार'इति। कृपा चात्र निरुपधिपरदुःखप्रहाणेच्छा, उपधिश्छलम्। तच्च सुखविशिष्टत्वम्। वैशिष्ट्यञ्च स्वसामानाधिकरण्यस्वविषयकेच्छाप्रयोज्यत्वोभयसम्बन्धेन। तादृशोभयसम्बन्धेन सुखविशिष्टान्यत्वमेवात्र निरुपधित्वं बोध्यम्। पारावारपदेनात्र कृपाया व्याप्यवृत्तित्वमभिप्रेतम्। तेन स्वाभावासमानाधिकरणत्वे सति कृपाधिकरणत्वं नित्यज्ञानवतो यत्पदार्थस्य लभ्यते।

'परमगति'रिति अपवर्ग इति तदर्थः। स च चरमदुःखस्य विनाशः। स्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वमेव दुःखस्य चरमत्वम्।

'त्रिजगता'मिति। अत्र त्रिपदस्य स्वर्गमर्त्यपातालात्मकत्रितयपर्याप्तित्रित्वावच्छिन्नरूपविशेषार्थे लाक्षणिकत्वात् त्रीणि च तानि जगन्ति चेति विग्रहे कर्मधारय-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

समासेन त्रिजगत्पदं निष्पन्नमिति बोध्यमन्यथा त्रिपदस्य सामान्यतस्त्रित्वावच्छिन्न-बोधकत्वे द्विगुत्वेन समाहारैकवचनान्तत्वापत्तेः। अत्र जगत्पदमपि न भुवनार्थ-प्रयुक्तमचेतनस्य तस्य परमगतित्वासम्भवात्। अपि तु तदधिकरणकजीवेषु लाक्षणिकं बोध्यम्। उक्तलाक्षणिकार्थैकदेशे च जगति त्रित्वावच्छिन्नस्याभेदेनान्वयो बोध्यः।

'नमस्तस्मा'इत्यादि। तथा च नित्यज्ञानवतेऽमितमहिम्ने पुरभिदे शिवाय नम इत्यर्थो बोध्यः। एवमपि नमस्कार्यस्य भगवतो यथायथवर्णनं न जातमित्याशङ्क्याह 'कस्मैचिदि'ति। वक्तुमशक्याय परमाश्चर्यायेति यावत्। अनेन च नमस्कर्तुर्भगवति शिवे भक्तिविशेषोऽपि विज्ञापितः। एवञ्च तस्मै कस्मैचिन्नम इत्यन्वये तेनैव वाक्यपरि-समाप्त्या पुनरमितमहिम्ने पुरभिदे इत्युक्त्यापतितस्य समाप्तपुनरात्ततादोषस्यापि निरासो जातः। नन्वेवमपि तस्मा अमितमहिम्ने पुरभिदे नम इत्येकस्य तस्मै कस्मैचिन्नम इत्यपरस्य च द्वयोर्वाक्ययोश्चतुर्थचरणस्य फलतः पर्यवसानादस्मिन् व्याख्याने वाक्यभेदापत्तिः सम्भवत्येकवाक्यत्वे वाक्यभेदो न चेष्यत इत्यभियुक्तोक्त्या तस्य दोषावहत्वादिति चेन्न। भिन्नत्वेऽपि वाक्ययोः परस्परसाकाङ्क्षत्वे तस्या-भियुक्ततरैरभिप्रेतत्वात्। अत्र नमःपदमेव प्रथमान्तमतस्तदर्थमुख्यविशेष्यताक एव चतुर्थचरणे वाक्यार्थबोधः स्यादन्यस्य प्रथमान्तपदस्याभावात्। अवशिष्टचरणत्रये च गुणातीतत्वादितत्तद्विशेषणैर्यत्पदार्थस्य नित्यज्ञानवत एव शाब्दबोधे मुख्यविशेष्यतया भानमभिप्रेतम्। स्वीयापकर्षप्रकारकबोधहेतुरुच्चारयितुर्व्यापारविशेष एव नमः-पदस्यार्थः। पुरभिदे इति चतुर्थीविभक्तेश्चावधिमत्त्वमर्थस्तस्य च निरूपितत्वसम्बन्धेन प्रकृत्यर्थान्वितस्य प्रोक्तनमःपदार्थैकदेशेऽपकर्षेऽन्वयात् पुरभिन्निरूपितावधिमदपकर्ष-प्रकारकबोधहेतुर्मणिकारीयो व्यापार इत्याकारकः शाब्दबोधो लभ्यते ॥१॥

अन्वीक्षानयमाकलय्य गुरुभिर्ज्ञात्वा गुरूणां मतं
चिन्तादिव्यविलोचनेन च तयोः सारं विलोक्याखिलम्।
तन्त्रे दोषगणेन दुर्गमतरे सिद्धान्तदीक्षागुरु-
गङ्गेशस्तनुते मितेन वचसा श्रीतत्त्वचिन्तामणिम् ॥२॥

प्रमाणतत्त्वप्रतिपादकेभ्योऽन्यदीयग्रन्थेभ्यः स्वीयग्रन्थस्य वैशिष्ट्यं प्रति-पिपादयिषुर्मणिकार आह 'अन्वीक्षानयमाकलय्य'इत्यादि। गङ्गेशः श्रीतत्त्वचिन्तामणिं तनुते इत्यन्वयः। श्रीतिपदं प्राशस्त्यद्योतकं न तु ग्रन्थनामान्तर्गत तत्त्वचिन्तामणी-त्यस्यैव ग्रन्थनामत्वेन प्रसिद्धत्वात्। गङ्गाया ईशः सागरो यथा रत्नभूतं मण्यादिकं तनुते तथायमपि ग्रन्थकारो गङ्गेशनामा मैथिलस्तत्त्वात्मकं चिन्तामणिं तनुत इति गङ्गेशपदेन मणिपदेन चोपमालङ्कारो द्योतित इति बोध्यम्। गङ्गायाः सरित ईशः सागरो यथा रत्नानि तनुते तथायमपि प्रमाणतत्त्वात्मकं मणिं रत्नं तनुत इत्यार्थिकोप-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मालङ्कारो ज्ञापितः। गङ्गेशनामा ग्रन्थकारः किम्भूत इत्याकाङ्क्षायामाह 'सिद्धान्तदीक्षागुरु'रिति। सिद्धस्येदन्त्वादिसामान्यधर्मप्रकारेणाभ्यनुज्ञायमानस्य अन्त इत्थम्भावव्यवस्था सिद्धान्तः। तथा च सामान्यतो विशेषतश्च निश्चीयमानोऽर्थः सिद्धान्त इति भावः। निरुक्तस्य सिद्धान्तस्य या दीक्षोपदेशस्तस्य गुरुः कर्ता। किमाश्रितोऽसौ सिद्धान्तो यस्य दीक्षागुरुर्गङ्गेश इत्याकाङ्क्षायामाह 'तन्त्र' इति। तन्त्रं शास्त्रं तस्मिन् यः सिद्धान्तस्तस्य दीक्षागुरुः। तथा च शास्त्राश्रितस्य सिद्धान्तस्योपदेशको गङ्गेश इति भावार्थः। शास्त्राश्रितस्य सिद्धान्तस्य पूर्वाचार्यैर्बहुधोपदेशादनर्थकोऽयमुपदेशोद्यमो नवीनस्येत्यत आह 'दोषगणेन दुर्भ्रमतर' इति। तथा च दोषारोपेण नास्तिकैः कदर्थितत्वाच्छास्त्रस्येदानीं नवीनया रीत्या सिद्धान्तोपदेशस्य सर्वथापेक्षितत्वेन न गङ्गेशस्य तादृगुद्यमो निष्फल इति भावार्थः। नवीनैरुपदिष्टे सिद्धान्ते कथं नानास्थेत्याशङ्कायामाह 'अन्वीक्षे' त्यादि। भगवद्भाष्यकारीयनिरुक्त्यनुसारेणान्वीक्षापदं यद्यप्यनुमित्यात्मकमेवार्थं समर्पयति तथापि तदिह तत्प्रतिपादकविद्यारूपे एवार्थे ग्राह्यमन्यथा नयपदार्थासङ्गतेः। तथा चान्वीक्षानयमित्यस्यान्वीक्षिकशास्त्रस्य नयमित्यर्थो बोध्यः। 'गुरुभिर्ज्ञात्वे'त्युक्तिः स्वीयाकलने परेषामास्थोत्पादनाय। अन्यथा ग्रन्थाध्ययने प्रेक्षावतामप्रवृत्तिर्वा स्यात्। 'चिन्तादिव्यविलोचनेन चे'त्याद्युक्तिर्ग्रन्थकारस्य स्वस्मिन्नपक्षपातं सूचयति। तथा च पक्षपातित्वराहित्यादपि ग्रन्थकारीयः सिद्धान्तो नानास्थास्पदमिति भावार्थः ॥२॥

यतो मणेः पण्डितमण्डनक्रिया
प्रचण्डपाषण्डतमस्तिरस्क्रिया।
विपक्षपक्षे न विचारचातुरी
न च स्वसिद्धान्तवचो दरिद्रता ॥३॥

ग्रन्थस्यास्य कथं तत्त्वचिन्तामणिरित्यभिधेयमित्याकाङ्क्षायां मणिसादृश्यप्रतिपादनेनोत्तरमारचयति 'यतो मणे' रित्यादि। यतः पण्डितमण्डनक्रियाद्यात्मकानि मणिसादृश्यान्यत्र ग्रन्थे सन्ति अतोऽस्य 'तत्त्वचिन्तामणि' रित्यभिधेयं युक्तिमदेवेति भावार्थः। पण्डितमण्डनक्रियात्मकस्य मणिधर्मस्य स्वग्रन्थे सत्त्वान्मणिसादृश्येन ग्रन्थस्यापि तत्त्वचिन्तामणिनाम्ना समाख्यानं युक्तिमदेवेत्यर्थः। अपरमपि मणिसादृश्यं ग्रन्थस्य दर्शयति 'प्रचण्डपाषण्ड' त्यादि। मणिर्यथा प्रचण्डपाषण्डात्मकानां तमसां तिरस्क्रियां करोति तथा ग्रन्थोऽपि प्रचण्डपाषण्डतमोरूपस्य नास्तिक्यवादस्य तिरस्क्रियां विदधातीति मणिसादृश्येन तन्नाम्ना तस्याभिधानमुचितमेवेति भावार्थः। अन्यदपि तदाह 'विपक्षपक्ष'इत्यादि। मणौ सत्त्वे तदीयप्रभया यथा विपक्षाणां चोरादीनां विचरणचातुर्यं न घटते तथा तत्त्वचिन्तामण्यर्थज्ञानसत्त्वेऽपि विरोधिपक्षाणां

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

विचारे चातुर्यं न भवतीति ग्रन्थस्य मणिसादृश्यं बोध्यम् । भिन्नमपि तत् प्रतिपादयति 'न चे'त्यादि । तथा हि मणिस्वामिनो यथा स्वस्य धनस्य सिद्धान्तवचसोऽवसानबोधक-वाक्यस्यादरिद्रता न भवति तादृशकथनस्याभाव एव भवतीति यावत् तथा चिन्तामणि-स्वामिनोऽपि स्वीयसिद्धान्तवाक्यस्य दरिद्रता अभावः कदापि न भवतीति ग्रन्थस्य चतुर्था मणिसादृश्यं बोध्यम् । अत्रान्तिमचरणस्य मणिपक्षीयव्याख्यायां स्वसिद्धान्त-वचोऽदरिद्रतेत्यकारस्य प्रश्लेषो बोध्यः ॥३॥ इति शम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तत्त्वचिन्तामणौ

प्रामाण्यवादः

अथ जगदेव दुःखपङ्कनिमग्नम् उद्दिधीर्षुरष्टादशविद्यास्थानेषु अभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय ।

मङ्गलम्

अनन्ताख्यमपादानं नामं नामं प्रभाह्वयाम् ।
दाक्षिण्थो वैदिको विप्रो गौरीनाथः प्रभासुतः ॥ १ ।

इषु-ख-ग्रहचन्द्राङ्के बिभ्रत्पाशुपतं महः ।
मणिप्रामाण्यवादस्य समीक्षां तनुते मुदा ॥ २ ।

उत्तमफलसम्बन्धविज्ञानमन्तरेण शास्त्राध्ययनेऽप्रवर्तमानानां समीक्षकाणां स्वग्रन्थाध्ययने प्रवर्तनाय निःश्रेयसफलकशास्त्रोपकारकत्वेन तत्त्वचिन्तामणेः फलवत्त्वं सम्बन्धाभिधेये च प्रतिपादयन् प्रतिजानीते **अथ जगदेवेत्यादि**। विना प्रयोजनवत्ताबोधं मन्दानामप्यप्रवृत्तिदर्शनात् प्रेक्षावत्तां प्रवृत्तौ सफलत्वज्ञानस्य प्रयोजकत्वं सिद्धं भवति ।

"सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते ।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥"

इत्यभियुक्तोक्त्या तथैव प्रतिपादनात् "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" इति प्रथमसूत्रेण सूत्रकारः स्वीयग्रन्थस्य निःश्रेयसफलकत्वं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कथयाम्बभूव। तदभिधेयान्तर्गतप्रमाणतत्त्वस्यात्र तत्त्वचिन्तामणिग्रन्थे सविस्तरं निरूपणादस्य चिन्तामणिग्रन्थस्य सकलशास्त्रोपकारकत्वं शास्त्रैकदेशसम्बन्धाच्छास्त्रकार्यान्तरे मतान्तरविमर्शनादौ च प्रवृत्तेः शास्त्रप्रकरणत्वञ्च बोध्यम्।

तथा च सूत्रप्रतिपाद्यार्थप्रतिपादकत्वेन सूत्रसम्बन्धित्वादस्य ग्रन्थस्य सूत्रप्रयोज्यफलप्रयोजकतया निःश्रेयसफलकत्वं सिद्धं भवतीति ध्येयम्। ग्रन्थादौ सामान्यतोऽप्यभिधेयस्याकथने तदज्ञानात् समीक्षकाणां कदाचिद् ग्रन्थाध्ययनेऽप्रवृत्तिः स्यादित्याशङ्कयाऽभिधेयस्य सामान्यतः कथनं शास्त्रारम्भे ग्रन्थकाराणां नानतिप्रयोजनकमिति भावः। सम्बन्धश्चाभिधेयेन प्रयोजनस्य, प्रयोजनाभिधेयाभ्याञ्च शास्त्रस्य बोध्यः। प्रथमस्तु स्वप्रयोजनज्ञानविषयत्वरूपः, अभिधेयशास्त्रयोः प्रतिपाद्यप्रतिपादकभावरूपः, प्रयोजनशास्त्रयोश्च प्रयोज्यप्रयोजकभावरूपोऽत्रगन्तव्यः। ग्रन्थेऽनभिहितोऽपि सम्बन्धोऽर्थादवगन्तुं शक्य इत्यलमतिविस्तरेण। 'प्रमाणतत्त्वमत्र विविच्यते' इत्यनेन ग्रन्थेन प्रमाणतत्त्वस्य चिन्तामणिग्रन्थाभिधेयत्वं लभ्यते। प्रधानतया ग्रन्थप्रतिपाद्यस्यैव ग्रन्थाभिधेयत्वेनाभियुक्तैर्व्यवह्रियमाणत्वात्। प्रमाणतत्त्वं विविच्यत इत्यस्य ग्रन्थांशस्य प्रतिज्ञात्मकत्वं बोध्यम्, येन च वाक्येनायमर्थो ग्रन्थकृद्भिर्निरूपयिष्यत इत्येवमाकारकं ज्ञानं विनेयजनानां भवेत्, तदेव वाक्यं प्रतिज्ञात्वेन विद्वत्समाजे प्रसिद्धमास्ते। उत्तरकालीनकर्तव्यत्वप्रकारकबोधानुकूलव्यापारविशेषस्यैव तल्लक्षणत्वात्, प्रमाणतत्त्वं विविच्यत इत्यनेन ग्रन्थेन प्रमाणतत्त्वस्य निरूपणीयत्वं विनेया अनायासेन ज्ञातुमर्हन्तीति तस्य वाक्यस्य प्रतिज्ञारूपत्वं बोध्यम्।

अस्मिन् सूत्रोपकारके चिन्तामणिप्रकरणे सूत्रोक्तानि प्रमेयादितत्त्वानि विहाय प्रमाणतत्त्वमेव कस्मान्निरूपितमित्याशङ्कायामाह—तेष्वपि प्रमाणाधीना सर्वेषां व्यवस्थितिरितीति। प्रमाणव्यतिरिक्तानां सूत्रोक्तप्रमेयादिपञ्चदशपदार्थानां तत्त्वानि प्रमाणेनैव व्यवस्थितानि भवेयुरिति उपजीव्यत्वात् पूजिततमत्वाच्चात्र ग्रन्थे प्रमाणतत्त्वस्य निरूपणीयत्वं बोध्यम्। व्यवस्थितिरितीति पदं हेतौ प्रयुक्तम्। यस्मात् सर्वेषां प्रमेयादिपदार्थानां व्यवस्थितिरिदमित्थमेवेति निर्णयः प्रमाणाधीनैव। तस्मादत्र ग्रन्थे प्रमाणतत्त्वं मया मणिकारेण विविच्यत इति भावार्थः। **तत्र प्रेक्षावदित्यादि**। तत्रेत्यान्वीक्षिक्यां विद्यायामित्यर्थः। सप्तम्या उपादानत्वाख्यं विषयत्वमर्थस्तस्य चाग्रिमेण प्रवृत्तिपदार्थेनान्वयो ज्ञेयः। प्रेक्षावत्प्रवृत्त्यर्थमित्यादावसूत्रयदित्यन्वयि। किमसूत्रयदिति कर्माकाङ्क्षायामाह **प्रमाणादीनामित्यादि**। इदमर्थतः सूत्रग्रहणं न तु पदतस्तस्यान्यादृशस्य पूर्वमुक्तत्वात्। साकाङ्क्षत्वानुकूलो व्यापारः सूत्रणम्। तदेकदेशीभूते साकाङ्क्षत्वे प्रमाणादीनां तत्त्वज्ञानान्निःश्रेयसाधिगम इतीतिपदोत्तरवर्तिलुप्तद्वितीयार्थवृत्तित्वस्यान्वयो बोध्यः। प्रेक्षावत्प्रवृत्त्यर्थमिति क्रियाविशेषणीभूतपदार्थस्य

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रेक्षावत्प्रवृत्तिजनकत्वावच्छिन्नस्य पूर्वोक्तव्यापारात्मकधात्वर्थेऽन्वयादान्वीक्षिकीविद्योपादानकप्रेक्षावन्निष्ठप्रवृत्तिजनको यः प्रमाणादीनां तत्त्वज्ञानान्निःश्रेयसाधिगमरूपसूत्रवृत्तिसाकाङ्क्षत्वानुकूलो व्यापारस्तदनुकूलकृतिमानक्षपाद इत्येवमाकारकः शाब्दबोधो लभ्यत इति भावः। यदि च प्रेक्षावत्प्रवृत्यर्थमिति समस्तपदान्तर्गतप्रवृत्तिपदस्यार्थे, तत्रेति सप्तम्यन्तार्थन्यायशास्त्रोपादानकत्वस्यान्वये सापेक्षत्वेनासामर्थ्येऽसमास आपद्येत तदा तत्रेति सप्तम्या अन्तर्गतत्वमर्थो बोध्यस्तस्य चेतिपदार्थेऽन्वयेनापत्तिः समाधेयेति सर्वं चतुरस्रम्।

प्रयोजनाभिधेयसम्बन्धप्रतिपादानस्याधिक्येनात्र प्रकृत उपयोगादुत्तरवर्तिनोऽपि तत्र प्रेक्षावत्प्रवृत्यर्थमित्याद्यंशस्य प्रथमं व्याख्या विहिता। इदानीं पूर्ववर्तिनोऽथ जगदेवेत्याद्यंशस्य व्याख्या प्रस्तूयते।

ननु चिन्तामणिग्रन्थे प्रमाणतत्त्वस्यैव विवेचनीयत्वेन गौतमस्य महर्षेस्तत्प्रतिपादकविद्याप्रवक्तृत्वकथनात्मकोऽथ जगदेवेत्याद्यंशोऽर्थान्तरताकवलित इति चेत्, न, तस्यापि मणिग्रन्थाध्ययनोपादानकप्रेक्षावत्प्रवृत्तौ परम्परयोपयोगात्। अथेति। अनन्तरमिति तदर्थः। अस्य च तादात्म्येन विविच्यत इति धात्वर्थे विवेचनायामन्वयः। आनन्तर्यस्य नियमेन प्रतियोगिसापेक्षत्वात् पूर्वानुष्ठितं मङ्गलमेवाध्याहृतमङ्गलादिपदोपस्थापितं प्रतियोगितयाऽत्रान्वियात्। पदानुपस्थापितार्थस्य शाब्दबोधेऽभानान्मङ्गलादिपदमत्रावश्यमध्याहर्तव्यम्।

आलोकप्रकाशकारादयस्तु मङ्गलवादस्यापि चिन्तामणिग्रन्थान्तर्गतत्वं स्वीकुर्वाणा मङ्गलसफलत्वव्यवस्थापनस्यैव प्रतियोगितयाऽऽनन्तर्येऽन्वयमाहुः। 'अथ' पदसम्बलितं मूलपाठमभ्युपगच्छन्नपि दीधितिकारस्तस्य न किमपि व्याख्यानं कृतवान्, मथुरानाथेनाप्यत्रालोककारादिप्रदर्शित एव पन्था अनुसृतः।

यद्येवमुच्येत—नमस्काराद्यात्मकमङ्गलानन्तर्यस्य वाचिकमङ्गलस्थले ग्रन्थे सन्निवेशादेव लाभसम्भवेनानन्यतात्पर्यकस्य मङ्गलानन्तर्यमात्रस्याज्ञातप्रयोजनकत्वेन च तन्मात्रबोधनाय प्रयुक्तस्याथशब्दस्यापि निष्प्रयोजनकत्वमेव स्यादिति, तदत्राथशब्दस्यारम्भार्थकत्वमेव ग्राह्यम्, तस्य च आरब्धत्वस्य धात्वर्थे विवेचनायामन्वयात् प्रमाणतत्त्वविषयकविवेचना आरभ्यत इत्येवमर्थे पर्यवसानं बोध्यम्।

न चैवमारम्भमात्रतात्पर्यकस्यापि शब्दविशेषस्य प्रयोगोऽनतिप्रयोजनक एवेति वाच्यम्, ग्रन्थान्तरसाङ्कर्यस्थले प्रकृतग्रन्थस्य पूर्वावधिनिर्णये सहायकत्वेन वाचनिकारम्भज्ञानस्य सप्रयोजनत्वात्, अन्यथा 'अथ शब्दानुशासनम्, अथ 'योगानुशासनम्' इत्यादिवत्सौत्राथशब्दस्याप्यारम्भार्थकस्य निष्प्रयोजनकत्वापत्तेः।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वस्तुतस्तु मूलकारीयस्वग्रन्थे अथ तत्त्वचिन्तामणिः। जगदेव दुःखपङ्के निमग्न-मुद्दिधीर्षुरष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय इत्येवमेव पाठ आसीत्। पश्चाच्चानुलिखने परैस्तत्त्वचिन्तामणिपदस्य ग्रन्थनामत्वेन पत्रपार्श्वे देशे सन्निवेशितत्वादनन्तरमथ जगदेवेति पाठस्य विपरिणामो जातः। अस्मिन् पक्षे आरम्भ एवाथशब्दस्यार्थस्तस्य च तत्त्वचिन्तामणावन्वयात्तत्त्वचिन्तामणिनामको ग्रन्थः समारभ्यत इत्यन्वयबोधोऽथशब्दानुशासनमथयोगानुशासनमित्यादौ शब्दानुशासनं नाम शास्त्रं योगानुशासनं नाम वा शास्त्रमारभ्यत इत्यन्वयबोध इव स्यात्[1]। तत्रैवात्राप्यारम्भकथनं नानतिप्रयोजनकमिति ध्येयम्।

मङ्गलवादस्य तत्त्वचिन्तामण्यन्तर्गतत्वपक्षे त्वानन्तर्यमेवाथपदार्थः स्यान्नारम्भस्तस्य प्रमाणतत्त्वविवेचनायामन्वयसम्भवेऽपि तद्बोधस्य निष्प्रयोजनत्वात्, प्रमाणतत्त्वविवेकतः पूर्वमेव शास्त्रस्यारब्धत्वेन तदंशस्य तत्त्वचिन्तामणिग्रन्थपूर्वावधित्वासम्भवात्। आनन्तर्ये चात्रत्याथपदार्थे मङ्गलस्य सफलत्वनिरूपणं प्रतियोगितयान्वियात्। **'मङ्गलवादः समाप्तः'** इति पूर्वकथितमङ्गलवादपदस्यैव मङ्गलनिष्ठसफलत्वनिरूपणात्मकोऽर्थो बोध्यः। तादृशार्थस्य पदानुपस्थाप्यत्वेऽथपदोपस्थाप्यानन्तर्यघटकध्वंसपदार्थप्रतियोगितयान्वयासम्भवात्। मङ्गलवादपदार्थान्वितानन्तर्यस्य चाथपदार्थस्य **'विविच्यते'** इति धात्वर्थे विवेचनायामन्वयान्मणिकारप्रयोज्यं यन्मङ्गलनिष्ठसफलत्वनिरूपणध्वंसाधिकरणकालवृत्तिविवेचनं तद्विषयः प्रमाणतत्त्वमित्येवमन्वयबोधो लभ्यते। प्रमाणतत्त्वविवेचने मङ्गलसफलत्वनिरूपणानन्तर्यकथनञ्च प्रमाणतत्त्वे मङ्गलसफलत्वस्य सङ्गतिसूचनाय, तेन चोभयोः परिच्छेदयोरेकग्रन्थान्तर्गतत्वं प्राप्तं भवति। सङ्गतिश्चात्रावसरात्मको बोध्यः। विरोधिजिज्ञासानिवृत्त्युपलक्षितं वक्तव्यत्वमेवावसरः।

'गुणातीतोऽपीशः' इत्यादिभिमङ्गलकरणानन्तरं शिष्याणां मङ्गलस्य सफलत्वे जिज्ञासा जाता। तया च शिष्यजिज्ञासया प्रमाणतत्त्वनिरूपणं ग्रन्थकाराणां प्रतिरुद्धमिति तस्या विरोधिजिज्ञासाया मङ्गलस्य सफलत्वनिरूपणेन विषयसिद्ध्या निवृत्तावनन्तरं किं प्रमाणतत्त्वमित्याकारिकया शिष्यजिज्ञासया प्रमाणतत्त्वं विवेचितं मणिकृता। अनन्तरवक्तव्यत्वसम्बन्धेन स्मृते प्रमाणतत्त्वे इष्टसाधनताज्ञानं शिष्यजिज्ञासायां कारणमित्यनन्तराभिधानप्रयोजकजिज्ञासाजनकस्मरणप्रयोजकसम्बन्धत्वस्य वक्तव्यत्वे सत्त्वात् तस्य सङ्गतित्वमिति ध्येयम्।

जगदेवेत्यादि। यस्माज्जगद्दुःखपङ्कनिमग्नमेव तस्मात्तदुद्दिधीर्षुः परमकारुणिको मुनिरान्वीक्षिकीं प्रणिनायेत्येवमन्वयो बोध्यः। अत्र जगत्पदं मिथ्याज्ञान-

१. अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते। शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्। (महाभाष्यपस्पशाह्निकम्—पृ० ३)

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

जन्यवासनाविशिष्टजीवात्मसमूहार्थकम्, तत्र चावच्छेदकावच्छेदेन दुःखपङ्कनिमग्नपदार्थस्याभेदेन विधेयतयान्वयो बोध्यः, अयोगव्यवच्छेदार्थकैवकारसन्निधानादेव विधेयस्यावच्छेदावच्छेदेनान्वयो लभ्यते। उद्दिधीर्षुरिति। अत्र दुःखपङ्कनिमग्नरूपविधेयांशस्य यदुद्देश्यं तदेव जगत्। मिथ्याज्ञानजन्यवासनाविशिष्टसमूहात्मकं तत्पदस्यार्थः। तादृशं समूहमुद्दिधीर्षुर्मुनिरान्वीक्षिकीं प्रणिनायेत्यर्थः। उद्दिधीर्षुरित्यत्र चरमदुःखध्वंसानुकूलो व्यापारो धात्वर्थः, तादृशव्यापारविषयिणीच्छा च सन्प्रत्ययस्यार्थः। तत्र धात्वर्थतावच्छेदकीभूतस्य व्यापारजन्यचरमदुःखध्वंसात्मकफलस्य मिथ्याज्ञानजन्यवासनाविशिष्टजनसमूहात्मकजगत्पदार्थे सत्त्वात्तस्योद्दिधीर्षाकर्मत्वं बोध्यम्।

न चेदानीमपि तादृशजगत्पदार्थान्तर्गतानामनेकेषां चरमदुःखध्वंसानाधारत्वाद्धात्वर्थतावच्छेकीभूतचरमदुःखध्वंसात्मकफलवत्त्वाभावाज्जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुः परमकारुणिको मुनिरष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं प्रणिनायेति वाक्यमयोग्यमिति वाच्यम्, इच्छार्थकप्रत्ययसमभिव्याहारस्थले धात्वर्थतावच्छेदकफलवत्त्वेनाभिप्रेतत्वस्यैव कर्मविहितविभक्त्यर्थत्वात्। एवञ्चामुक्तात्मनां तादृशफलानाधारत्वेऽपि तादृशफलवत्त्वेनाभिप्रेतत्वादुक्तवाक्यस्य नायोग्यत्वमिति ध्येयम्।

ननु लाघवात् प्रसिद्धेश्च जगत्पदमशेषार्थकमेवास्तु। न चैवं सति जगत्पदार्थान्तर्गते भगवति मुक्तात्मसु च दुःखपङ्कनिमग्नत्वाभावेन तद्विशेषणमयोग्यं स्यात्। तेषामप्युद्दिधीर्षोद्देश्यत्वे मुनीच्छाया विसंवादश्चापद्येतेति वाच्यम्, अशेषत्वसामानाधिकरण्येनैव दुःखपङ्कनिमग्नत्वस्य विशेषणत्वे तादृशविशेषणविशिष्टस्यैव जगतो मुन्युद्दिधीर्षोद्देश्यत्वे च वाक्यतात्पर्यादिति चेत्, न, दुःखपङ्कनिमग्नत्वस्योद्दिधीर्षोद्देश्यतावच्छेदकत्वे जगत्पदात् पूर्वमेव दुःखपङ्कनिमग्नपदस्य प्रयोगापत्तेः।

मथुरानाथस्तु जगदेवेति जगत्पदं वस्तुत्वेन रूपेण वस्तुमात्रार्थकमेवकारश्च समूहार्थकः। वस्तुत्वविशिष्टस्य एवकारार्थसमूहपदार्थेऽन्वयाद् वस्तुसमूहरूपोऽर्थो लभ्यते। तत्र च वस्तुसमूहे दुःखपङ्कनिमग्नपदार्थस्य सामानाधिकरण्येनान्वयाद् दुःखपङ्कनिमग्नवस्तुसमूहात्मकोऽर्थो लब्धः स्यात्। तादृशसमूहत्वसामानाधिकरण्येन दुःखपङ्कनिमग्नत्वस्यान्वयादेव न तदंशस्य बाधः। अवच्छेदकावच्छेदेन तदन्वयविवक्षणे तु तादृशसमूहान्तर्गतेषु घटपटादिषु मुक्तात्मेश्वरप्रभृतिषु च दुःखपङ्कनिमग्नत्वस्याभावेन विशेषणांशबाधो दुर्निवार एव स्यात्। एवञ्च दुःखपङ्कनिमग्नवस्तुसमूहस्यैव मुन्युद्दिधीर्षोद्देश्यत्वमित्याहुः। तन्न चारु। एवकारस्य समूहार्थकत्वे वस्तुसमूहे च दुःखपङ्कनिमग्नत्वान्वये सामानाधिकरण्येन तदन्वयोऽसमञ्जस एव स्यात्। समूहत्वविशिष्टस्य विशेष्यत्वे सामानाधिकरण्येन कस्यापि पदार्थस्य विशेषणत्वविवक्षण विरुद्धमेव

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रतिभाति । घटजातं नीलमित्युक्ते केचिदेव घटा नीला न तु सर्वे इत्येवं वाक्यार्थबोधः कुत्रापि न दृश्यते ।

यद्युच्येत न तावत् प्रथमतो जगत्पदार्थस्य वस्तुत्वविशिष्टस्यैवकारार्थे समूहेऽन्वयः, अपि तु दुःखपङ्कनिमग्नत्वस्यैवेति । एवञ्च दुःखपङ्कनिमग्नत्वविशिष्टस्यैव जगत्पदार्थस्य पश्चादेवकारार्थेऽन्वयः । तथा च वस्तुत्वसामानाधिकरण्येन दुःखपङ्कनिमग्नत्वस्यान्वयेनासामञ्जस्यम् । तादृशविशिष्टानामेव जगत्पदार्थवस्तूनामेवकारार्थसमूहेऽन्वयेन दुःखपङ्कनिमग्नवस्तुसमूहरूपोऽर्थः प्राप्यते । तस्यैव च मुन्युद्दिधीर्षोद्देश्यत्वमिति न किञ्चिदप्यनुपपन्नमिति । तन्न, प्रदर्शितदिशान्वयविवक्षणे दुःखपङ्कनिमग्नपदस्य जगत्पदात् पूर्वं प्रयोगापत्तेः । अपि च सामानाधिकरण्येन दुःखपङ्कनिमग्नत्वस्य जगत्पदार्थे वस्तुन्यन्वये द्वित्राः संसारिण आत्मानोऽपि ग्रहीतुं शक्याः । तादृशस्य एवकारार्थसमूहपदार्थेऽन्वये तु केवलं त एव संसारिणः समूहपदार्थः स्यात् । तथा च तेषामुद्दिधीर्षोद्देश्यत्वे बहूनां संसारिणामुद्दिधीर्षानुद्देश्यत्वेन मुनेः परमकारुणिकत्वस्य हानिः प्रसज्येतेति ध्येयम् ।

अष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीमिति ।

अङ्गानि चतुरो वेदा मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश ॥
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः ।
अर्थशास्त्रं चतुर्थन्तु विद्या ह्यष्टादशैव तु ॥

इति विष्णुपुराणे[1] अष्टादशविद्यानां परिगणनं दृश्यते । शिक्षाकल्पनिरुक्तव्याकरणच्छन्दोज्योतिषमिति षड्विधानि वेदाङ्गशास्त्राणि । ऋक्सामयजुरथर्वेति चत्वारो वेदाः । मथुरानाथोद्धृतश्लोके च चतुरो वेदा इत्यत्र वेदाश्चत्वार इत्येवं पाठो दृश्यते । विष्णुपुराणे तु चतुरो वेदा इत्येवमेव पाठः प्राप्यते । यद्यपि त्रयीति सुप्रसिद्धाभिधानेन वेदानां त्रिधाविभक्तत्वमाथर्वणस्य च ऋग्यजुःसामस्वेवान्तर्भावः सुशकः, तथापि मणिकारमते तस्य पृथगेव वेदत्वं बोध्यम् । तेन विद्यानामष्टादशविधत्वकीर्तनात् । जयन्तभट्टेनापि न्यायमञ्जर्यामाथर्वणस्य पृथगेव वेदत्वं व्यवस्थापितम् । 'ऋग्वेद भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थम्[2]' इत्यादि छान्दोग्यश्रुत्या चाथर्वणस्य चतुर्थवेदत्वं साक्षादेव कीर्तितमस्ति[3] ।

---

१. तृतीयभागे षष्ठेऽध्याये ।

२. अत्र मन्त्राणां त्रैविध्यं वेदानां चातुर्विध्यं ग्राह्यम् ।

३. छा० उ० ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

भगवता भाष्यकारेण "इमास्तु चतस्रो विद्याः पृथक्प्रस्थानाः प्राणभृतामनुग्रहायोपदिश्यन्ते, यासां चतुर्थीयमान्वीक्षिकी विद्या" इति वाक्याद्विद्यायाश्चतुर्धैव भेदः प्रदर्शितः। "चतस्र एव विद्याः" इति कौटिल्यः। ताभिर्धर्मार्थौ यद्विद्यात्तद्विद्यानां विद्यात्वम्। साङ्ख्यं योगो लोकायतञ्चेत्यान्वीक्षिकी। धर्माधर्मौ त्रय्याम्। अर्थानर्थौ वार्त्तायाम्। नयानयौ दण्डनीत्यामित्यर्थशास्त्रवाक्याच्छास्त्राणां चतुर्धा विभक्तत्व एव कौटिल्यस्यापि स्वरस इत्यवगम्यते।

त्रयी चान्वीक्षिकी चैव वार्त्ता च भरतर्षभ।
दण्डनीतिश्च विपुला विद्यास्तत्र निर्दशिताः[1]॥

इति भारतवाक्यादपि शास्त्राणां चतुर्धापि विभागो लभ्यते।

आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिस्तथैव च।
एवं व्याहृतयश्चासन् प्रणवो ह्यस्य दह्रतः॥

इति श्रीमद्भागवतवाक्येऽपि (३।१२।४४) शास्त्राणां विभागचतुष्टयत्वं दृश्यते।

त्रैविद्येभ्यस्त्रयीं विद्याद्दण्डनीतिञ्च शाश्वतीम्।
आन्वीक्षिकीञ्चात्मविद्यां वार्तारम्भांश्च लोकतः॥

इति मनुवचने।

स्वरन्ध्रगोप्तान्वीक्षिक्यां दण्डनीत्यां तथैव च।
विनीतस्त्वथ वार्त्तायां त्रय्याञ्चैव नराधिपः॥

इति याज्ञवल्क्यवचने च विद्यायाश्चत्वारो विभागाः प्राप्यन्ते।

एवञ्चाष्टादशविद्यास्थानेष्विति चतुर्विधविद्यास्थानेष्विति ज्यायः। विष्णुपुराणप्रथिताष्टादशविद्यास्थानकथनं तु मणिकाराणां संख्याधिक्यप्रदर्शनेन न्यायविद्यायाः पूजिततमत्वख्यापनाय, न तु विद्याविभागप्रदर्शनाय। भाष्यकारादिभिरतिप्रामाणिकैश्चतुर्धेति स्वशास्त्रे विद्यानां विभागप्रवचनात्।

अभ्यर्हिततमामिति। अन्यासु सर्वास्वेव विद्यास्वान्वीक्षिकीप्रतिपादितप्रमाणतर्काभ्यामेव तत्तद्विद्याप्रस्थानानि प्रतिपादितानीत्युपजीव्यत्वादान्वीक्षिकीविद्यायास्तदुपजीवकाभ्यो विद्याभ्यः पूजिततमत्वं बोध्यम्।

प्रत्यक्षमनुमानञ्च शास्त्रञ्च विविधागमम्।
त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता॥
आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः॥

---

१. महाभारते शान्तिपर्वणि ५९।३३।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इत्यादिभिर्मनुना ।

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता ॥

इत्यनेन अर्थशास्त्रकारेणापि तथैव प्रतिपादनात् ।

न च

अहमासं पण्डितको हैतुको वेदनिन्दकः ।
आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थिकाम् ॥
हेतुवादान् प्रवदिता वक्ता सत्सु च हेतुमत् ।
आक्रोष्टा चातिवक्ता च ब्रह्मवाक्येषु च द्विजान् ॥
नास्तिकः सर्वशङ्की च मूर्खः पण्डितमानिकः ।
तस्येयं फलनिर्वृत्तिः शृगालत्वं मम द्विज[1] ॥

इत्यादिमहाभारतवचनैरतिशयेन निन्दितत्वात् कथमस्या आन्वीक्षिकीविद्याया अष्टादशविद्यासु पूजिततमत्वमिति वाच्यम्, तत्पुरुषीयनिन्दाप्रवृत्तेरेव तदीयशृगालयोनित्वं प्रति प्रयोजकत्वात् । तथा हि, आन्वीक्षिकीशास्त्रे वेदप्रामाण्यस्य स्वीकृतत्वेन तदधीयानस्य कस्यचिदपि न वेदनिन्दकत्वं भवितुमर्हति । यदि पुनः स्यात् तदा तत् प्रति तदीयपूर्वसंस्कारस्यैव प्रयोजकत्वं भवेत्, न तु तच्छास्त्रस्य न्यायविद्याध्ययनेन पूर्वसंस्काराधीननिन्दितत्वबुद्धेर्दृढतरत्वपक्षे तु तत्राप्युपकारकत्वेन विद्यायाः श्रेष्ठत्वमेवायाति । तादृशी खल्वान्वीक्षिकी विद्या सा, यत्रैव वा साध्वसाधुषु प्रयुक्ता भवति, तत्रैव दृढतां सम्पादयतीति तस्याः श्रेष्ठत्वमेव प्रतिपादितं भवति, न पुनर्निन्दितत्वम् ।

आन्वीक्षिकीमिति । अनु पश्चात् प्रत्यक्षात् परमिति यावत् । "अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतो दृष्टञ्चेति" सूत्रेणानुमाने प्रत्यक्षपूर्वकत्वस्य कथनात् तस्य प्रत्यक्षानन्तरत्वमर्थता लभ्यते । ईक्षाज्ञानमनुमितिरिति यावत् । तथा चान्वीक्षापदात् प्रत्यक्षमूलकत्वेनानुमितिरुपस्थाप्यते । तयान्वीक्षया प्रवर्तत इत्यान्वीक्षिकी तर्कविद्येति भावः । तां परमकारुणिको मुनिः प्रणिनायेत्यर्थः ।

एवञ्चान्वीक्षिकीपदं योगवृत्त्या प्रत्यक्षकारणकत्वेनानुमानप्रमाणस्य प्रतिपादकेषु शास्त्रेषु प्रवर्त्तते । अनुमानप्रतिपादकस्यापि बौद्धशास्त्रस्यान्वीक्षिकीपदानभिधेयत्वात् तत्र रूढिरपि वृत्तिरावश्यकी । तत्र च रूढतायामक्षपादप्रणीतत्वमेवावच्छेदकं बोध्यम् । तथा चोभाभ्यां वृत्तिभ्यामान्वीक्षिकीपदमक्षपादप्रणीतानुमानप्रतिपादके शास्त्रे प्रवर्त्तेत, नान्यत्र । गौतमीयधर्मशास्त्रेऽतिव्याप्तिवारणाय यौगिकत्वम्, बौद्धादिशास्त्रेष्वतिव्याप्ति-

१. महाभारते शान्तिपर्वणि १७०।४७-४९

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

निरासाय रूढत्वमावश्यकमिति बोध्यम्। रूढत्वज्ञानस्य केवलयौगिकार्थोपस्थितौ प्रतिबन्धकत्वात् सांख्यवैशेषिकादिषु शास्त्रेषु कदाचित् प्रवृत्तौ आन्वीक्षिकीपदस्य लक्षणावृत्तिरेवाश्रयणीया, न तु योगवृत्तिः। "सांख्यं योगो लोकायतञ्चेत्यान्वीक्षिकीत्य-नेनार्थशास्त्रे लक्षणया आन्वीक्षिकीपदस्य सांख्यवैशेषिकयोः प्रवृत्तिर्बोध्या। लोकायत-पदञ्चात्राक्षपादीयतर्कशास्त्रमेवोपस्थापयति। योगपदञ्च वैशेषिकशास्त्रं प्रतिपादयति। योगिपदस्य प्राचीनैः कणादे मुनौ प्रयुक्तत्वादिति ध्येयम्।

परमकारुणिक इति। परदुःखप्रहाणेच्छैव सोपधिः करुणा। निरुपधित्वमेव स्वसुखाननुसन्धानरूपमत्र परमत्वं करुणाया बोध्यम्। तथा च स्वसुखानुसन्धाना-भावविशिष्टपरदुःखप्रहाणेच्छावत्त्वेन मुनेरक्षपादस्य परमकारुणिकत्वमिति भावः। अथोद्दिधीर्षुरित्यनेनैव मुनेः परमकारुणिकत्वस्यापि लाभात्, पुनः परमकारुणिकत्व-कथनेन ग्रन्थस्यार्थपुनरुक्तादोष इति।

न चोद्दिधीर्षुरित्यनेन मुनेः परदुःखप्रहाणेच्छात्मककरुणावत्त्वलाभेऽपि तत्र निरुपधित्वस्यालाभात् तल्लाभाय परमकारुणिकत्वकीर्तनं सप्रयोजनत्वेन नार्थपुनरुक्ति-तापन्नमिति वाच्यम्, मुनेः स्वातन्त्र्येण मोक्षजनकतत्त्वप्रतिपत्त्यनुकूलशास्त्रप्रवक्तृत्वे तस्य स्वीयतत्त्वप्रतिपत्तेरवश्यमङ्गीकरणीयत्वेन स्वसुखाभिसन्धानासम्भवादुद्दिधीर्षायां निरुपधित्वस्याप्यर्थतोऽवश्यं लब्धत्वादिति चेत्, न, निरुपधिपरदुःखप्रहाणेच्छाप्रयो-ज्यस्य प्रयत्नस्यात्र परमकारुणिकपदेनोपलक्षितत्वादिति ध्येयम्। तथा च न मुनिः केवलमुदिद्धीर्षुरेव, परमुद्धारानुकूलप्रयत्नवानपीत्यर्थलाभेनापुनरुक्तेरिति ध्येयम्।

अथ मिथ्याज्ञानजन्यवासनावतां प्राणिनामुद्देशेन मुन्युदिदधीर्षायाः कीर्तनात् तादृशोदिदधीर्षाप्रयुक्तशास्त्रमपि तानेव प्राणिनोऽधिकुर्यात्, स्वजन्यज्ञानभागितया प्रणेत्रभिप्रायोद्देश्यस्यैव शास्त्रेऽधिकारितानिर्वाहकत्वात्। एवं ज्ञानाधिकारिताप्रयोजक-शूद्रादिशरीरावच्छेदेनापि तत्त्वज्ञानोत्पत्तीच्छया मुनिना तत्त्वप्रतिपादकवाक्योच्चा-रणात्तस्य प्रत्यवायभागिता स्यात्। अनधिकारिणामध्यापनेऽध्यापयितुः प्रत्यवायस्य स्मरणात्। अन्यदीयज्ञानोत्पत्तीच्छया शब्दप्रयोगस्यैवाध्यापनात्मकत्वादिति चेत्, न, पश्वादिशरीरावच्छेदेनोद्धारस्य बाधितत्वान्मोक्षप्रयोजकागामिब्राह्मणादिशरीरान्तर्भा-वेणैव तेषामिदानीमुद्दिधीर्षोद्देश्यत्वेन तत्तच्छरीरावच्छेदेन तत्त्वज्ञानोत्पत्तीच्छया शास्त्रप्रणयनान्मुनेः प्रत्यवायाभावादिति दीधितिः। एतदप्यरुचिकरमेव विदुरादि-दृष्टान्तेन शूद्रशरीराणामपि मोक्षप्रयोजकत्वेन तत्तच्छरीरावच्छिन्नस्याप्युदिदधीर्षोद्देश्य-त्वस्याभ्युपगन्तव्यतया तादृशशरीरावच्छिन्नज्ञानोत्पत्त्यभिप्रायस्य मुनेः सम्भवात्तेषा-मध्यापनेनावश्यं प्रत्यवायात् परमकारुणिकत्वेन तादृशमत्यल्पं प्रत्यवायं स्वीकृत्यैव

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तत्र प्रेक्षावत्प्रवृत्त्यर्थं प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयसाधिगम इत्यादावसूत्रयत् ।

मुनिना शास्त्रप्रणयनात्, तपोवैशारद्येन तत्प्रत्यवायस्यानायासेनैव निराकरणादिति तात्पर्यकाराः । तत्त्वज्ञानवतां मुनीनामफलाकाङ्क्षित्वेन तदीयकर्मणां पुण्यापुण्याजनकत्वात्, "**न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य**" इत्यादिभिर्वचनैः शास्त्रकृद्भिस्तथैव प्रतिपादनादिति मादृशाः ।

"**प्रमाणादिषोडशपदार्थानाम्**" इत्यादि । एतच्च संक्षेपानुरोधादर्थतः सूत्रग्रहणम्, सूत्रन्तु यथासन्निवेशं पूर्वमुपस्थापितमिति पुनर्नोपस्थाप्यते । अनेन च समीक्षकपुरुषाणां न्यायशास्त्राध्ययने प्रवर्त्तनार्थं फलकीर्तनपूर्वकं तेन निःश्रेयसात्मकफलेन शास्त्रस्यास्य सम्बन्धः प्रतिपादितः । सम्बन्धश्च स्वकर्मकाध्ययनसाध्यतत्त्वप्रतिपत्तिनिर्वर्त्त्यत्वेन निःश्रेयसस्य प्रयोज्यप्रयोजकभावरूप एव । शास्त्रं प्रयोजकं निःश्रेयसञ्च तत्प्रयोज्यमिति भावः । अथ प्रदर्शितेन सूत्रेण षोडशपदार्थतत्त्वज्ञानप्रयोज्यत्वस्य निःश्रेयसे कथनात्तत्त्वज्ञाननिःश्रेयसयोरेव प्रयोज्यप्रयोजकभावरूपः सम्बन्धो लभ्यते ।

न तु शास्त्रनिःश्रेयसयोस्तयोः प्रयोज्यप्रयोजकभावस्य सूत्रेऽकथनादिति कथं सूत्रस्य शास्त्राध्ययने प्रेक्षावत्प्रवर्तकत्वं निर्वहति ।

न च तत्त्वं ज्ञायतेऽनेनेति करणव्युत्पत्त्या निष्पन्नत्वेन तत्त्वज्ञानपदं शास्त्रात्मस्वार्थं समर्पयति निःश्रेयसायाधिगमस्तत्त्वप्रतिपत्तिरिति चतुर्थीसमासान्तनिःश्रेयसाधिगमपदञ्च निःश्रेयसजनकतत्त्वज्ञानरूपमर्थमुपस्थापयति । तत्त्वज्ञानादितिपञ्चम्यर्थप्रयोज्यत्वस्य प्रदर्शिताधिगमपदार्थेऽन्वयात् सूत्रत एव निःश्रेयसफलकाधिगमात्मकतत्त्वज्ञाने शास्त्रप्रयोज्यत्वस्य लाभ इति वाच्यम्, एवमपि निःश्रेयसात्मकफलेन शास्त्रसम्बन्धस्य साक्षादप्राप्तेः । अर्थतस्तल्लाभकथने च तत्त्वज्ञाननिःश्रेयसाधिगमपदयोस्तादृशकूटव्याख्यानमनतिप्रयोजनकमेव स्यात् ।

प्रमाणादिषोडशपदार्थानामिति शैषिकी षष्ठी । सम्बन्धत्वेन रूपेण निष्ठत्वं तदर्थस्तस्य च तत्त्वज्ञानपदार्थैकदेशे तत्त्वेऽन्वयात् प्रमाणादिषोडशपदार्थसम्बद्धानि यानि तत्त्वानि प्रमाणादीनि, तेषां निश्चयान्निःश्रेयसाधिगमो भवतीति वाक्यार्थो लभ्यते प्रदर्शितषष्ठ्यर्थनिष्ठत्वस्य कुत्रापि धात्वर्थेऽन्वयासम्भवेनाकारकत्वाच्छैषिकत्वं बोध्यम् । कारकादन्यः शेष इति स्मरणात् ।

तत्त्वज्ञानादिति । तत्त्वानां ज्ञानं तत्त्वज्ञानम्, तस्मात् । अत्र च ज्ञानमिति भावविहितकृद्योगे कर्मणि षष्ठीति ज्ञेयम् । तथा च कारकषष्ठीविभक्तेर्लोपात् तत्पुरुष-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तेष्वपि प्रमाणादीनां सर्वेषां व्यवस्थितिरिति प्रमाणतत्त्वमत्र विविच्यते ।

समासः। अत्र च पदार्थानामिति शैषिकषष्ठ्यर्थनिष्ठत्वसापेक्षत्वेऽपि तत्त्वपदार्थस्य चैत्रस्य दासभार्येत्यादाविव नियतससम्बन्धिकपदत्वात् समासस्य साधुत्वमिति मन्तव्यम्। अत्रत्यपञ्चम्यर्थस्य निःश्रेयसाधिगम इत्यत्राधिगमपदार्थेऽन्वयात् तत्त्वज्ञानान्निःश्रेयसाधिगम इति समासे न सापेक्षत्वम्। निःश्रेयसस्याधिगमो निःश्रेयसाधिगम इति कर्मत्वार्थकषष्ठ्या लोपादेव समासेऽधिगम इति भावविहितकृदन्तयोगात् कर्मणि तस्या एव विभक्तेः प्राप्तत्वात्। भगवता भाष्यकारेण प्रदर्शितयैव दिशा षष्ठीत्रयं व्युत्पादितम्। अत्राधिगमपदं लाभार्थे प्रयुक्तम्। निःश्रेयसलाभे निःश्रेयससामग्रीमात्रप्रयोज्यत्वंप्रदर्शनायाधिगमपदमिति विश्वनाथः। एवञ्च प्रमाणादिपदार्थतत्त्वज्ञानप्रयोज्यत्वस्य निःश्रेयसे वाक्यतो लाभेन शास्त्रकर्मकाध्ययनस्याभिधेयतत्त्वज्ञानजनकताया अन्वयव्यतिरेकाभ्यां लोकत एव प्राप्त्या चानायासेनैव शास्त्रनिःश्रेयसयोः प्रयोज्यप्रयोजकभावरूपः सम्बन्धो विनेयैर्लभ्यत इति ध्येयम्।

इति तत्त्वचिन्तामणिप्रभायाम्

अधिकारिविषयसम्बन्धप्रयोजननिरूपणं नाम प्रकरणम्।

तत्रभवद्भिः सूत्रकारैः संक्षेपेण षोडश पदार्था निरूपिताः। तेषु पदार्थेषु तत्त्वचिन्तामणौ प्रमाणतत्त्वमात्रस्य निरूपणे ग्रन्थकारः स्वाभिप्रायं विवृणोति **'तेष्वपि प्रमाणाधीनेत्यादि'। सर्वेषामिति।** प्रमेयादिविग्रहस्थानान्तानां पञ्चदशविधपदार्थानामिति तदर्थः। **'व्यवस्थितिरिति'**। तत्त्वविनिर्णय इत्यर्थः। तथा चान्येषां पञ्चदशपदार्थानां तत्त्वविनिर्णयस्य प्रमाणसाध्यत्वाल्लोकेषु च साध्यतः साधकेऽधिकसमादरदर्शनात् तत्त्वचिन्तामणौ प्रमाणतत्त्वमात्रनिरूपणे ग्रन्थकारस्याग्रहो युक्त एव प्रतिभातीति भावार्थः।

अत्रेदमालोचनीयम्। तेष्वपि प्रमाणाधीना सर्वेषां व्यवस्थितिरिति ग्रन्थेन प्रमाणस्य पदार्थान्तरापेक्षया प्राशस्त्यं प्रतिपादितं मणिकारैः। प्रमेयादीनामन्येषां पदार्थानां तत्त्वव्यवस्था तद्विनिश्चितिरूपा प्रमाणाधीना चेत्, तदा तत्त्वविनिश्चितिसाधकत्वेन तत्त्वविनिश्चितिरूपात् स्वसाध्यादेव प्रमाणस्य प्राशस्त्यमायाति, न तु स्वरूपतः आत्मादिरूपप्रमेयतोऽपि। तेन प्रमाणस्य प्राशस्त्यं पर्यवस्यति। तत्तत्प्रमेयस्वरूपं प्रति प्रमाणस्यासाधकत्वात्। तथा च तदितरेभ्यः सर्वेभ्यः पदार्थेभ्यः प्रमाणस्य प्राशस्त्यकीर्तनं ग्रन्थकृतां कथं नासङ्गतमिति चेत्, न, मोक्षशास्त्रे स्वरूपतः पदार्थानामकिञ्चित्करत्वेन तेषां तत्त्वविनिर्णयस्यैवात्र विवक्षितत्वात्। तथा च तत्साधकत्वेन प्रमाणस्य ततः प्राशस्त्ये यथाप्रयोजनं तदितरेभ्यः सर्वेभ्य एव पदार्थेभ्यः प्रमाणस्य प्राशस्त्यं सिद्धं भवतीति मन्तव्यम्।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु प्रमाणादीनां तत्त्वं प्रतिपादयच्छास्त्रं परम्परया निःश्रेयसेन सम्बध्यत इति न युक्तम्, प्रमाणतत्त्वावधारणस्याशक्यत्वात्। तद्धि प्रमातत्त्वावधारणाधीनम्, तच्च स्वतः परतो वा न सम्भवति, वक्ष्यमाणदूषणगणग्रासात्।

अथ यदि साधकत्वेन हेतुना मोक्षफलकतत्त्वपरिच्छित्तेरपि प्रमाणस्य प्राशस्त्यमभिप्रेतं स्यात्, तदा साधकत्वाविशेषात् प्रमातृप्रमेययोरपि प्रशस्तत्वेन तयोरपि निरूपणं प्राप्तं भवति, तथा च तयोः परिहारेण प्रमाणतत्त्वमात्रनिरूपणे ग्रन्थकृतां न्यूनतेति चेत्, न, फलं प्रति साधकतमत्वस्यैवात्र प्राशस्त्यज्ञापकत्वेन ग्रन्थकृतामभिप्रेतत्वात्। प्रमातृप्रमेययोस्तत्त्वपरिच्छित्तिरूपफलं प्रति साधकत्वेऽपि साधकतमत्वाभावेन तदनिरूपणेऽपि ग्रन्थकृतां न्यूनतादोषपरिहारसम्भवादिति भावः।

तथा हि प्रमीयते अनेनेति व्युत्पत्त्या करणत्वार्थकल्युट्प्रत्ययेन निष्पन्नं प्रमाणपदं प्रमाकरणरूपमर्थमभिदधाति। **'साधकतमं करणम्'**[1] इति पाणिनिस्मृत्या च कारकाणां प्रशस्तकारकस्यैव करणत्वं प्रतिपादितम्। कारकाणां कार्यान्वयव्यतिरेकयोः साधारणत्वेऽपि सति भवनमेव न त्वभवनमित्येव प्राशस्त्यम्। स च फलेनायोगस्य व्यवच्छेदः, कारकाणां मध्ये यत्र फलायोगव्यवच्छेदः स्यात्, स एव प्रशस्ततया करणं स्यात्। प्रमातृप्रमेययोः कदाचित् कारकान्तराणामसमवधाने तत्त्वपरिच्छित्तिरूपफलेनायोगोऽपि दृश्यत इति ते कारके अपि न प्रशस्ते। विषयेन्द्रियसन्निकर्षादिरूपकारके च तत्त्वपरिच्छित्तिरूपफलेनायोगाभावात् तत् प्रशस्ततया करणमेव। एवञ्चाप्राशस्त्यात् प्रमातृप्रमेययोरनिरूपणेऽपि न ग्रन्थकृतां न्यूनतेति सर्वं समञ्जसम्।

भाष्यकृद्भिश्च षोडशपदार्थेषु प्रमाणस्य प्राधान्यमन्यथा प्रतिपादितम्। तथा हि प्रमाणस्य प्राधान्येऽर्थवत्त्वमेव हेतुः। अर्थवदिति नित्ययोगार्थे मतुप्। अव्यभिचार एवात्र नित्ययोगः। स तत्र नित्ययोगी भवति, यस्तमर्थं कुत्रापि कदापि न व्यभिचरति। प्रमाणप्रदर्शितस्यार्थस्य स्वरूपप्रकारयोः कालान्तरे देशान्तरेऽवस्थानान्तरे वा विसंवादाभावात् प्रमाणस्यार्थाव्यभिचारित्वम्, अत एव प्रमेयादिपञ्चदशपदार्थेभ्यः प्रमाणस्य प्राधान्यमिति भाष्यकृतामभिप्रायः। यद्यपि प्रमातृप्रमेयप्रमितीनामप्यर्थाव्यभिचारित्वमस्त्येव, तथापि प्रमाणस्यैव द्वारत्वात् तस्यैव प्राधान्यं बोध्यम्। प्रमातृप्रभृतीनां प्रमातृत्वादिस्वरूपनिर्वाहे प्रमाणस्यैव प्रयोजकत्वादिति तात्पर्यम्।

निःश्रेयसेन प्रयोजनेन सह शास्त्रस्य सम्बन्धप्रतिपादनार्थं पूर्वं यदुक्तं पूर्वपक्षोपस्थापनार्थम्, तत् पुनरनुवदति ननु **प्रमाणादीनां तत्त्वमित्यादि**। तथा च मोक्षार्थी पुरुष आचार्याच्छास्त्रमधीत्य प्रमाणादीनां षोडशविधपदार्थानां तत्त्वं विजानाति।

---

१. अष्टा० १।४।४२।

शास्त्रस्यास्य मननसहायकत्वादिदं शास्त्रार्थविज्ञानं मननात्मकमेवेति बोध्यम्। अनन्तरञ्च यथाविधि निदिध्यासनेनात्मतत्त्वं प्रत्यक्षतो निश्चित्य देहादावात्माभिमानात्मकं मिथ्याज्ञानं विजहाति, तेन च विरक्तः सन्नफलकामो न प्रवर्तते, तेन च नूतनधर्माधर्मासंग्रहात् सञ्चितानाञ्च कर्मणां तत्त्वज्ञानेनैव पूर्वं विनष्टत्वात् प्रारब्धभोगावसानेऽशरीरी भूत्वा न पुनर्दुःखमनुभवति। तथा च प्रदर्शितप्रणाल्या चरमदुःखनिवृत्तिं प्रति शास्त्रस्य प्रयोजकत्वाच्छास्त्रं निःश्रेयसेन फलेनाभिसम्बद्धं भवतीति पूर्वमुक्तम्।

यदिदमुक्तं निःश्रेयसेन शास्त्रस्य सम्बद्धत्वम् तन्न सम्भवति, षोडशविधतत्त्वेषु प्रथमस्य प्रमाणतत्त्वस्य विनिश्चयासम्भवादिति पूर्वपक्षतात्पर्यम्।

पूर्वपक्षी स्वाभिप्रायं विभज्य प्रतिपादयति तद्धीत्यादि। तथा हि प्रमाणतत्त्वं तदैवावधारितं स्याद् यदि प्रमायास्तत्त्वं पूर्वमवधारितं भवेत्, प्रमाकरणत्वरूपस्य प्रमाणतत्त्वस्य प्रमातत्त्वघटितत्वात्। विशिष्टस्य ज्ञाने च विशेषणज्ञानस्य हेतुत्वात्। द्विधा खलु तत्त्वावधारणा भवितुमर्हति, स्वतः परतो वा, प्रकारान्तराभावात्। प्रकृते च स्वतः परतो वा न प्रमातत्त्वस्यावधारणं सम्भवति। प्रकारान्तरञ्च तत्र नास्त्येव। एवञ्च प्रमातत्त्वावधारणासम्भवात् प्रमाणतत्त्वस्यावधारणासम्भवो बोध्यः। प्रमातत्त्वावधारणासम्भवे हेतुरग्रे प्रदर्शयिष्यते। तथा च फलेनाभिसम्बन्धाभावाच्छास्त्रं प्रेक्षावतामग्राह्यमेवेति पूर्वपक्षनिगर्वः।

प्रदर्शितस्य पूर्वपक्षस्य समाधानमभीप्सुः कश्चित् तटस्थः पूर्वपक्षस्यार्थान्तरतां प्रतिपादयितुं चेष्टते अथेत्यादि। तथाहि मा भूत् प्रमात्वस्यावधारणं प्रमेयतत्त्वावधारणन्तु प्रमाणस्वरूपादेव सम्भवत्येव। एवञ्चाप्रामाण्यज्ञानानास्कन्दितात् प्रमेयतत्त्वावधारणादेव निःश्रेयसाधिगमोपपत्तेः। स्वप्रतिपाद्यार्थतत्त्वप्रतिपादनद्वारा शास्त्रस्य प्रयोजनेन सम्बन्धात् प्रेक्षावतां शास्त्राध्ययनोपादानकप्रवृत्तौ नास्ति किमपि बाधकम्।

न च सत्यपि शास्त्रस्य प्रयोजनेन सम्बन्धे शास्त्रं निःश्रेयसप्रयोजकमिति प्रेक्षावदध्ययनप्रवृत्त्यौपयिकेष्टसाधनताज्ञाने प्रमात्वस्य स्वतः परतो वा निश्चयासम्भवात् प्रेक्षावतामप्रवृत्तिस्तदवस्थैवेति वाच्यम्, प्रवर्तकज्ञाने प्रमात्वावधारणस्य व्यभिचारेण प्रवृत्तित्वावच्छिन्नं प्रत्यहेतुत्वात्। तथा चानाकाङ्क्षिताभिधानत्वेन पूर्वपक्षो न युक्त इति समाधातुरभिमानः।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अथ किं प्रामाण्यज्ञानेन प्रवृत्तिमात्रे तस्य व्यभिचारात् । बहुवित्त-व्ययायाससाध्ये प्रवृत्तिश्च आवश्यकार्थनिश्चयादेव ।

अथ 'ननु प्रमाणादीनाम्' इत्यादिपूर्वपक्षग्रन्थे प्रेक्षावतामध्ययनप्रवृत्तेर्गन्धोऽपि नास्ति । तेन ग्रन्थेन केवलं शास्त्रप्रयोजनयोरसम्बन्धस्यैव प्रतिपादितत्वादिति प्रवर्तकज्ञाने प्रमात्वावधारणानर्थक्यकथनं तटस्थस्याप्रासङ्गिकत्वेन प्रलाप एव भवतीति चेत्, न, शास्त्रे प्रयोजनेन सम्बन्धसूचनस्याध्ययनप्रवृत्तिमात्रोपयोगित्वेनासम्बन्धोक्तेर-ध्ययनाप्रवृत्तितात्पर्यकत्वादिति ध्येयम् ।

अत्रेदं वक्तव्यम् । तत्रभवद्भिरालोककृद्भिः नन्वित्यादिप्रवृत्तिमात्रे तस्य व्यभिचारादित्यन्तग्रन्थो न व्याख्यातः । दीधितिकारैरपि नन्वित्यादिवक्ष्यमाणदूषण-गणग्रासादित्यन्तस्य ग्रन्थस्य यद्यपि व्याख्यानं न प्रस्तुतम्, तथापि 'अथ' इत्यादि-ग्रन्थस्याशयस्तैरुद्घाटितः । प्रवर्तकज्ञाने प्रामाण्यं व्यवस्थापयच्छास्त्राध्ययने प्रेक्षावतः प्रवर्त्तयति, तेन च शास्त्रं निःश्रेयसेन फलेन सम्बद्धं भवतीति पूर्वपक्षं कस्यचित् समाधानरूपेण 'अथ' इत्यादिग्रन्थस्तैरुपस्थापितः ।

अन्ये पुनर्न्यायसूत्रात्मकशास्त्रादेवाध्येतृपुरुषाणां प्रमाणादिपदार्थतत्त्वावधारण-मनन्तरञ्च निःश्रेयसाभ्युपगतौ शास्त्रं फलेनाभिसम्बद्धं स्यात्, शास्त्रञ्च तत्कर्त्तु-स्तदुपादानकप्रवृत्त्यनन्तरं प्रणीतं स्यात् । तदुपादानकप्रवृत्तिश्च ग्रन्थकारस्य निश्चित-प्रामाण्यकाच्छास्त्रधर्मिकफलसाधनताज्ञानादेव भवेत् । तच्च फलसाधनताज्ञानीय-प्रामाण्यावधारणं ग्रन्थकृतो न सम्भवति । तदानीमपि तत्कारणस्य शास्त्रस्यानुत्पादा-दिति 'ननु' इति शङ्काग्रन्थतात्पर्यं विशदयन्ति ।

अत्रोत्तरमाह **अथ किं प्रामाण्यज्ञानेनेति ।** शास्त्रं निःश्रेयसप्रयोजकमिति यद् ग्रन्थकर्त्तुः शास्त्रोपादानकप्रवृत्त्यौपयिकं फलसाधनताज्ञानं तद्धर्मिकेण प्रामाण्य-प्रकारकनिश्चयेनालमित्यर्थ इत्याहुः । एतदसमीचीनमेव प्रतिभाति । प्रमात्वादीनां पदार्थतत्त्वानामवधारणं शास्त्रादेवैतस्मान्नान्यस्मादुपायादिति ग्रन्थकर्त्तुः शास्त्रधर्मिक-फलसाधनताज्ञानधर्मिकं प्रमात्वावधारणं शास्त्रप्रणयनप्रवृत्त्यौपयिकं न भवितुमर्हति, तदानीमपि प्रमात्वावधारणोपायस्यास्य शास्त्रस्यानुत्पन्नत्वेनाविद्यमानत्वादिति पूर्वपक्षस्याशयः । तच्च स्वतः परतो वा न सम्भवति, वक्ष्यमाणदूषणगणग्रासादिति पूर्वपक्षसमर्थकमणिपङ्क्तेरनुत्थानापत्तेरिति ध्येयम् ।

एवञ्चाध्येतृपुरुषीयं यच्छास्त्राध्ययनप्रवृत्त्यौपयिकं शास्त्रधर्मिकनिःश्रेयस-साधनताज्ञानम्, तद्धर्मिकस्यैवाध्येतृपुरुषीयप्रमात्वावधारणस्योपायाभावान्निषेधे पूर्वपक्षिणां तात्पर्यं ग्राह्यम् । उपायाभावात् प्रमात्वात्मकप्रमाणतत्त्वावधारणासम्भव-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रदर्शनमुखेन शास्त्रस्य निःश्रेयसरूपफलाभिसम्बन्धप्रत्याख्यापनद्वारा पूर्वपक्षरचना-सम्भवेऽप्यथेत्याद्युत्तराभासग्रन्थस्यासंलग्नत्वापत्त्याध्येतृपुरुषीयस्याध्ययनप्रवृत्त्यौपयिक-फलसाधनताज्ञानधर्मिकप्रमात्वावधारणस्य निषेधेऽस्माभिः पूर्वपक्षग्रन्थस्य तात्पर्यमभि-हितमित्यलमतिविस्तरेण । पूर्वपक्षश्चायं वैतण्डिकानामेव ।

तथा सत्येव तच्च स्वतः परतो वा न सम्भवतीत्यस्याः पूर्वपक्षसमर्थकपङ्क्तेरवतारण-सम्भवात् । तन्मत एव प्रामाण्यस्य तदवधारणोपायस्य च सर्वथानभ्युपगमात् । अन्येषाञ्च प्रमात्वावधारणोपायत्वेन स्वतस्त्वपरतस्त्वपक्षयोरन्यतरस्मिन्नभ्युपगतिदर्शनात् ।

प्रवर्त्तकेष्टसाधनताज्ञानधर्मिकप्रमात्वनिश्चयस्य प्रवृत्तावनपेक्षां प्रतिपादयति **प्रवृत्तिमात्रे तस्येत्यादि ।** प्रवृत्तिमात्रे इति प्रत्येकं प्रवृत्तिव्यक्ताविति तदर्थः । अत्रा-श्रितत्वं सप्तम्यर्थस्तस्याग्रिमे व्यभिचारपदार्थेऽन्वयो बोध्यः । तस्येति तत्पदं प्रवृत्त्यौ-पयिकेष्टसाधनताज्ञानधर्मिकप्रामाण्यनिश्चयपरम् । षष्ठी च प्रतियोगित्वपरा ।

ननु कृष्यादिविषयकफलसाधनतासंशयपरतन्त्रायां कृष्याद्युपादानकप्रवृत्तौ फलसाधनताप्रकारकज्ञानधर्मिकप्रामाण्यनिश्चयस्य व्यतिरेकव्यभिचारसत्त्वेऽपि न प्रवृत्तिमात्रे सोऽस्ति, बहुवित्तायाससाध्योपादानकप्रवृत्तौ फलसाधनताज्ञानधर्मिक-प्रामाण्यप्रकारकनिश्चयपूर्वकत्वस्य दर्शनादिति चेत्, न, इत्याह **बहुवित्तव्यया-याससाध्य** इत्यादि । **अर्थनिश्चयादेवेति** प्रवृत्तिविषयधर्मिकफलसाधनतारूपस्यार्थस्य विनिश्चयादेवेति तदर्थः । तथा च बहुवित्तायाससाध्ये वस्तुनि प्रवृत्तौ तदुपादनधर्मिक-फलसाधनताया निश्चयोऽपेक्षितः, न तु तादृशज्ञानधर्मिकप्रमात्वनिश्चयोऽपीति सर्वासु प्रवृत्तिव्यक्तिषु प्रमात्वनिश्चयस्य व्यतिरेकव्यभिचारसत्त्वात् प्रवृत्तिमात्रे तस्य व्यभिचारादिति पूर्वतनपङ्क्तिरबाधितार्थैवेति मन्तव्यम् ।

यत्र च बहुवित्तायाससाध्ययुद्धादिस्थले युद्धमेतन्मदीयजयसाधनं न वेति संशयस्तत्र जयात्मकफलसाधनतारूपस्यार्थस्यानिश्चयादेव युद्धोपादानकाप्रवृत्त्युपपत्तेर्न तेन फलसाधनताज्ञानधर्मिकप्रामाण्यनिश्चयाभावप्रयोज्यत्वमप्रवृत्तौ प्रमाणीभवति । यत्र च तादृशस्थलविशेषे प्रथमं प्रवृत्तिविषये फलसाधनताया निश्चयात्मकं ज्ञानं जातम्, अनन्तरञ्च तादृशफलसाधनतानिश्चये प्रामाण्यसन्देहादप्रवृत्तिः, तत्रापि फलसाधनतानिश्चयस्याव्यवहितपूर्वमसत्त्वादेव तस्योपपत्तिः स्यादिति न तेनापि बहुवित्तायाससाध्यवस्तूपादानकप्रवृत्तेः फलसाधनताज्ञानधर्मिकप्रामाण्यविनिश्च-यस्यापेक्षा प्रमाणिता भवति । तत्र फलसाधनतानिश्चयधर्मिकाप्रामाण्यसंशयादनन्तर-क्षणेऽवश्यं फलसाधनतायाः सन्देहः स्यात्, ज्ञानधर्मिकाप्रामाण्यसंदेहस्यार्थसन्देहं प्रति हेतुत्वात् । तादृशार्थसन्देहकाले च पूर्वोत्पन्नस्यार्थविनिश्चयस्यावश्यं विनाशेनार्थ-विनिश्चयाभावादेवाप्रवृत्तेरुपपत्तेरित्यलमतिविस्तरेण ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न च यत्संशयव्यतिरेकनिश्चयौ यस्य प्रवृत्तिप्रतिबन्धकौ[1] तन्निश्चयस्तद्धेतुरनुमितौ व्याप्तेरिवेति वाच्यम् ।

प्रकारान्तरेणेष्टसाधनताज्ञानधर्मिकप्रामाण्यावधारणस्य प्रवृत्तौ कारणत्वं व्यवस्थापयितुं कश्चित्तटस्थः शङ्कते **न च यस्य संशयव्यतिरेकनिश्चयावित्यादि।** न च यद्विषयकसंशयाद् यद्व्यतिरेकविषयकनिश्चयाच्च यद्विषयकनिश्चयस्य सर्वथा भिन्नत्वाद् यद्विषयकसंशयव्यतिरेकनिश्चयगतप्रतिबन्धकत्वेन सह यद्विषयकनिश्चयगतकारणत्वस्य निरोधात् कथं तयोर्व्याप्यव्यापकभावः सम्भवतीति वाच्यम्, यद् यत्संशयव्यतिरेकनिश्चयप्रतिबन्धकतानिरूपितप्रतिबध्यतावत्तत्तन्निश्चयजन्यमित्यस्यैव नियमस्यात्र विवक्षितत्वात् । तथा च तादृशप्रतिबध्यतावत्त्वस्य तन्निश्चयजन्यत्वस्य चैकत्रावस्थानान्न साध्यहेत्वोर्वैयधिकरण्यमिति सर्वं सुसङ्गतम् ।

प्रदर्शितनियमग्राहकं दृष्टान्तमाह **अनुमितावित्यादि।** व्याप्तिसंशयव्यतिरेकनिश्चयप्रतिबन्धकतानिरूपितप्रतिबध्यताकायामनुमितौ व्याप्तिनिश्चय इवेति तदर्थो बोध्यः । व्याप्तिसंशयव्यतिरेकनिश्चयप्रतिबन्धकतानिरूपितप्रतिबध्यतावत्त्वे सति व्याप्तिनिश्चयजन्यानुमितिवदिति यावत् । एवञ्च प्रेक्षावत्प्रवृत्तिरिष्टसाधनताज्ञानधर्मिकप्रमात्वनिश्चयजन्या तद्धर्मिकप्रमात्वसंशयव्यतिरेकनिश्चयप्रतिबन्धकतानिरूपितप्रतिबध्यतावत्त्वादित्याकारकानुमित्या प्रमात्वनिश्चयस्याध्ययनप्रवृत्तौ कारणत्वं सिद्धं भवति । तथा च स्वतः परतो वा तन्निश्चयसम्भवेनाध्ययनप्रवृत्त्यभावान्न शास्त्रं फलेनाभिसम्बन्ध्यत इति पूर्वपक्षिणो निगूढ आशयः ।

अथ यस्य संशयव्यतिरेकनिश्चयाविति मूलस्थस्य यस्येति षष्ठ्यन्तार्थस्य संशये व्यतिरेके चान्वयो भवेत् । कस्यापि चैकस्य षष्ठ्यर्थस्योभयत्रान्वयासम्भवात् तस्यार्थद्वयमावश्यकम् । अन्यस्य विषयत्वरूपस्य तदर्थस्य संशयेऽन्यस्य च प्रतियोगित्वात्मकतदर्थस्य व्यतिरेकेऽन्वयः कर्त्तव्यः, एतच्चायुक्तम् । **'सकृदुच्चरितः शब्दः सकृदर्थं गमयति'** इत्यभियुक्तोक्तेरिति चेत्, न, घटस्य संशय इति प्रामाणिकप्रयोगानुरोधात् संशयादिपदसमभिव्याहारस्थले षष्ठ्या एकाधिकार्थकल्पनाया आवश्यकत्वात् । तथा हि घटस्य इत्यत्र संशयपदं व्यतिरेकावगाहिसमानधर्मिकज्ञानात्मकमर्थमुपस्थापयति । तदेकदेशव्यतिरेके षष्ठ्यन्तार्थस्यैकस्य घटप्रतियोगित्वस्य निरूपकत्वसम्बन्धेनापरस्य घटविषयकत्वस्य स्वरूपेण ज्ञानेऽन्वयात्, घटप्रतियोगिताकव्यतिरेकावगाहिसमानधर्मिकघटविषयकज्ञानरूपो वाक्यार्थो लभ्यते ।

---

१. 'यत्संशयव्यतिरेकौ यस्य प्रवृत्तिप्रतिबन्धकौ' इति सोसाइटि—मुद्रितः पाठः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वस्तुतस्तु संशयव्यतिरेकनिश्चयावित्यत्र द्वन्द्वसमासाद् वाक्यभेदस्यावश्यकत्वेन द्विधैव यस्येतिपदस्य सन्निवेशान्नैकस्या षष्ठ्या अर्थद्वयं कल्पनीयम्। यस्य संशयो यस्य व्यतिरेकनिश्चयश्च प्रवृत्तिप्रतिबन्धकावित्येवंरूपेण मूलवाक्यस्य पर्यवसानात् प्रथम-षष्ठ्यन्तार्थस्य यद्विषयकत्वस्य संशये द्वितीयषष्ठ्यन्तार्थस्य च यत्प्रतियोगिकत्वस्य व्यतिरेकनिश्चयघटकव्यतिरेकेऽन्वयान्नैकस्याः षष्ठ्या अर्थद्वयकल्पनावश्यकीति भावः। प्रदर्शितदिशा वाक्यभेदेऽपि यस्य संशय इत्येतद्वाक्यघटकषष्ठ्या विषयताकत्वरूपस्य प्रतियोगिताकत्वरूपस्य चार्थद्वयस्य कल्पनमावश्यकम्। व्यतिरेकावगाहिसमानधर्मिक-ज्ञानात्मकसंशयपदार्थघटकव्यतिरेके प्रतियोगिताकत्वस्य ज्ञाने च विषयताकत्वस्या-वश्यमन्वयात्।

यस्य संशयव्यतिरेकनिश्चयौ प्रवृत्तिप्रतिबन्धकौ इति मूलस्थं प्रवृत्तिपदं प्रकृत-विचारस्य प्रवृत्तिप्रासङ्गिकत्वेन सम्पातादायातं सामान्यव्याप्तिशरीरे प्रवृत्तित्वेन तस्या अप्रवेशात्। यत्संशयव्यतिरेकनिश्चयप्रतिबन्धकताकं यत्तत्तन्निश्चयजन्यमित्येवमाकारेण सामान्यमुख्या व्याप्तेर्यत्तद्घटितत्वस्य पूर्वं प्रदर्शितत्वात्। **मथुरानाथैस्त्वत्रत्यप्रवृत्ति-पदमुत्पत्त्यर्थकतया व्याख्यातम्**[1]। तथा च तन्मते यत्संशयव्यतिरेकनिश्चयप्रतिबन्ध-कताकोत्पत्तिकं यत् तत्तन्निश्चयजन्यमित्येवंरूपेण सामान्यमुखी व्याप्तिः पर्यवसिता स्यात्। एतन्नास्मभ्यं रोचते। **मूलकारेण** प्रवृत्तिपदमुत्पत्त्यर्थे प्रयुक्तमित्यस्यासम्भ-विततया कल्पयितुमशक्यत्वात्। **आलोककारेण, प्रकाशकारेणापि** प्रवृत्तिपदस्य प्रकृत-तात्पर्यकतयैव व्याख्यानात्।

यद् यत्संशयव्यतिरेकनिश्चयप्रतिबन्धकताकं तत्तन्निश्चयजन्यमिति नियमे व्याप्यकोटौ संशयत्वेन संशयाप्रवेशे यद्यद्व्यतिरेकनिश्चयप्रतिबन्धकताकं तत्तन्निश्चय-जन्यमित्येवं नियमः स्यात्, तन्न सम्भवति, व्यभिचारात्। तथा हि ग्राह्याभावाव-गाहित्वेन 'घटाभाववान् देशः' इत्याकारकनिश्चयस्य 'घटवान् देशः' इत्याकारक-विशिष्टबुद्धिं प्रति प्रतिबन्धकत्वमस्ति। तत्र घटवत्तानिश्चयजन्यत्वाभावाद् व्यभिचारः परिस्फुट एव विद्यते। संशयप्रवेशे च तत्र विशिष्टबुद्धौ घटवत्तासंशयप्रतिबन्धकता-कत्वाभावाद् व्यभिचारो निरस्तो भवति। अतस्तत्र नियमे संशयत्वेन संशयस्य प्रवेश आवश्यक इति बोध्यम्। व्याप्यकोटौ व्यतिरेकनिश्चयाप्रवेशे च यद् यत्संशयप्रति-

१. प्रवृत्तिप्रतिबन्धकाविति प्रवृत्तिरुत्पत्तिर्यस्येत्यनुषज्यते। अग्रेऽपि प्रवृत्तिपदं तदुत्पत्तिपरम्। तथा च यस्य संशयो यस्य व्यतिरेकनिश्चयश्च यदुत्पत्तिप्रतिबन्धकस्तन्निश्चयस्तद्धेतुरित्यर्थः। अन्यथा प्रवृत्तिपदस्य प्रयत्नपरत्वे अनुमितौ व्याप्तिरिवेति दृष्टान्तासङ्गतेः। (रहस्य पृ० १२१)।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

बन्धकताकं तत्तन्निश्चयजन्यमित्येवं नियमः स्यात् । एतच्च न सम्भवति, व्याप्तिनिश्चये व्यभिचारात् । तथा हि व्यभिचारात्मकस्य यत्पदार्थस्य यः संशयः, तत्प्रतिबन्धकता-कत्वमव्यभिचारात्मकव्याप्तिनिश्चयेऽस्ति । तत्र च व्यभिचारात्मकयत्पदार्थस्य यो निश्चयस्तज्जन्यत्वं नास्ति । व्यतिरेकनिश्चयप्रवेशे च व्यभिचारस्यानायासेनैव निरासो भवति । व्याप्तिनिश्चये व्यभिचारव्यतिरेकनिश्चयप्रतिबन्धकताकत्वाभावात् ।

नन्वेवमपि व्याप्तिनिश्चये व्यभिचारोऽस्त्येव । तथा हि, यथा व्यभिचारो यत्पदार्थत्वेन ग्रहीतुं शक्यः, तथा व्यभिचाराभावोऽपि यत्पदेनावश्यं ग्राह्यः स्यात् । व्यभिचाराभावात्मकयत्पदार्थस्य यः संशयस्तत्प्रतिबन्धकताकत्वं व्यभिचाराभावा-भावात्मकस्य तदव्यतिरेकस्य च यो निश्चयस्तत्प्रतिबन्धकताकत्वञ्चोभयमेवाव्यभि-चारात्मकव्याप्तिनिश्चयेऽस्ति । तत्राव्यभिचारात्मकस्य तत्पदार्थस्य यो निश्चयस्तज्जन्य-त्वाभावादव्यभिचारः स्फुट एवेति चेत्, न, प्रतिबन्धकीभूतयत्संशयत्वादौ यदभावत्व-प्रकारतानियतत्वस्य निवेशादव्यभिचारः । तथा ह्यव्यभिचारात्मकस्य यत्पदार्थस्य संशयत्वेन तद्व्यतिरेकनिश्चयत्वेन च यथेदमव्यभिचारि न वेत्याकारकसंशयस्येदं नाव्यभिचारीत्याकारकनिश्चयस्य च ग्रहणं भवति, तथेदं व्यभिचारि न वेत्याकारकस्यापि इत्याकारकनिश्चयस्य च ग्रहणं भवति, तथेदं व्यभिचारि न वेत्याकारकस्यापि ।

संशयस्यैवमिदं व्यभिचारीत्याकारकस्यापि तद्व्यतिरेकनिश्चयस्य ग्रहणं भवेत् । प्रथमयोः संशयव्यतिरेकनिश्चययोरिव द्वितीययोरप्यव्यभिचरितत्ववुद्धौ तुल्यत्वमेव । द्वितीययोश्च संशयनिश्चययोरव्यभिचरितत्वाभावत्वप्रकारत्वविरहान्नाव्यभिचारः संशय-व्यतिरेकनिश्चयगताया अव्यभिचरितत्ववुद्धिप्रतिबन्धकताया अव्यभिचरितत्वाभावत्व-प्रकारतात्मकयदभावत्वप्रकारतानैयत्यविरहेणाव्यभिचारस्य यत्पदार्थतया ग्रहीतुम-शक्यत्वेन प्रदर्शितसामान्यव्याप्तौ नास्ति व्यभिचार इति बोध्यम् ।

इदमत्रावधेयम्, यत्संशयगतप्रतिबन्धकतायां यद्व्यतिरेकनिश्चयगतप्रतिबन्धक-तायाश्च यद्भावत्वप्रकारतानियतत्वं न पृथक् पृथग् द्विधा निवेश्यं प्रयोजनाभावात्, अपि तु प्रदर्शितप्रतिबन्धकताद्वयान्यतरस्मिन्नेकधैव ।

न च व्यभिचारात्मकयत्पदार्थविषयकसंशयस्य व्यभिचाराभावात्मक-यद्व्यतिरेकनिश्चयश्च यदा घटाभावनिश्चयेन समूहालम्बनरूपता, तदा घटवत्ताबुद्धौ व्यभिचारसंशयव्यभिचारव्यतिरेकनिश्चयप्रतिबन्धकताकत्वमस्ति, तत्र च घटवत्ताबुद्धौ व्यभिचारनिश्चयजन्यत्वाभावात् प्रदर्शितसामान्यव्याप्तौ व्यभिचार इति वाच्यम्, यत्संशय-व्यतिरेकनिश्चयप्रतिबन्धकतायां यद्भावावगाहिता प्रयुक्तत्वस्यापि निवेशनीयत्वेन दोषा-भावात् । प्रदर्शितस्थले यत्पदार्थत्वेन व्यभिचारस्य ग्रहणाद् व्यभिचाराभावावगाहितैव

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यदभावावगाहिता स्यात्, निरुक्तसमूहालम्बनज्ञानात्मकव्यभिचारसंशयतद्व्यतिरेकनिश्चयगतायां घटवत्ताबुद्धिप्रतिबन्धकतायां घटाभावावगाहिताप्रयुक्तत्वस्यैव सत्त्वेन व्यभिचाराभावात्मकयदभावावगाहित्वासत्त्वादव्यभिचारो बोध्यः।

न च घटाभाववत्तानिश्चयात्मकसमूहालम्बनव्यभिचारसंशयतद्व्यतिरेकनिश्चयगताया घटवत्ताबुद्धिप्रतिबन्धकताया व्यभिचारसंशयाद्यनात्मके केवलघटाभाववत्तानिश्चयेऽपि सत्त्वेन तस्या व्यभिचाराभाववत्त्वात्मकयदभावत्वप्रकारतानैयत्यविरहेण प्रदर्शितस्थले व्यभिचारस्य यत्पदार्थतया अग्रहणादेव व्यभिचारनिश्चयाजन्यायां घटाभाववत्ताबुद्धौ निरुक्तसामान्यव्याप्तेरव्यभिचारान्न तदर्थप्रतिबन्धकतायां यदभावप्रकारताप्रयुक्तत्वं पृथङ्निवेश्यं प्रयोजनाभावादिति वाच्यम्। यत्र स्थलविशेषे वह्निव्यभिचारसंशयो वह्निव्यभिचारनिश्चयश्च यदभावप्रकारकनिश्चयेन समूहालम्बनरूप एव भवति, तत्र वह्वत्ताबुद्धौ प्रदर्शितसामान्यव्याप्तेर्व्यभिचारवारणाय प्रतिबन्धकतायां यदभावत्वप्रकारतानियतत्वनिवेशपक्षेऽपि पुनस्तत्र यदभावावगाहिताप्रयुक्तत्वस्यावश्यं निवेशनीयत्वात्।

न चैवं सति प्रदर्शितसामान्यव्याप्तिप्रविष्टव्याप्यकोटौ व्यतिरेकनिश्चयपदव्यावृत्तिप्रदर्शनार्थं यदुक्तं प्राक् तदसमीचीनमेव स्यात, तत्रत्यायां यत्संशयगतप्रतिबन्धकतायां यदभावावगाहिताप्रयुक्तत्वस्याभावात्। तथा हि, यद् यत्संशयव्यतिरेकनिश्चयप्रतिबन्धकताकं तत्तन्निश्चयजन्यमिति सामान्यव्याप्तिशरीरे यदि व्यतिरेकनिश्चयस्योपादानं न स्यात्तदा धूमो वह्निव्यभिचारी न वेति व्यभिचारसंशयप्रतिबन्धे धूमो न वह्निव्यभिचारीत्यव्यभिचारनिश्चये व्यभिचारनिश्चयजन्यत्वाभावात् प्रदर्शितसामान्यव्याप्तौ व्यभिचारो भवतीति पूर्वंव्यतिरेकनिश्चयव्यावृत्तिप्रदर्शनप्रसमयेऽस्माभिरुक्तम्। एतच्च न सम्यक्, प्रदर्शितव्यभिचारनिश्चये व्यभिचारात्मकयदर्थसंशयप्रतिबन्धकताकत्वसत्त्वेऽपि तत्रत्यप्रतिबन्धकतायां व्यभिचाराभावात्मकयदभावावगाहिताप्रयुक्तत्वस्य विरहेण व्यभिचारस्यैव तत्पदार्थतया ग्रहीतुमशक्यत्वादिति वाच्यम्, व्याप्तिशरीरप्रविष्टव्यतिरेकनिश्चयप्रतिबन्धकतायामेव यदभावावगाहिताप्रयुक्तत्वस्य निवेश्यत्वेन तदंशव्यावृत्तिचिन्तनकाले व्याप्तिशरीरादव्यतिरेकनिश्चयांशस्येव तदंशप्रविष्टयदभावावगाहिताप्रयुक्तत्वस्याप्यवश्यं परित्याज्यत्वात्। तथा च पूर्वप्रदर्शिता व्यावृत्तिः समीचीनैवेति ध्येयम्।

दीधितिकृद्भिस्तु यस्य संशयव्यतिरेकनिश्चयावित्यादिग्रन्थोऽन्यथैव व्याख्यातः। तथा हि यस्य संशयव्यतिरेकनिश्चयौ यस्य प्रतिबन्धकावित्युक्ते यस्य व्यतिरेकज्ञानसामान्यं यस्य प्रतिबन्धकमित्येवमेव तद्वाक्यस्य तात्पर्यार्थो भवति यद्व्यतिरेकनिश्चय

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इव यत्संशयेऽपि यद्व्यतिरेकज्ञानत्वस्य प्रायशो विद्यमानत्वात्। अतः प्रदर्शितग्रन्थ-व्याख्यानावसरे दीधितिकारैस्तेन व्यतिरेकज्ञानत्वेन प्रतिबन्धकता लभ्यत इत्युक्तम्।

न च यद्व्यतिरेकनिश्चयत्वेन यत्संशयत्वेन वाऽपरिगृहीतस्याप्यव्यभिचाराभाववान्न वेत्याकारकसंशयस्याव्यभिचारव्यतिरेकज्ञानात्मकस्य सत्त्वात् कथं तादृशवाक्याद्व्यतिरेकज्ञानसामान्यस्य प्रतिबन्धकता लभ्येत, प्रदर्शिताव्यतिरेकज्ञानव्यक्तेस्तद्ग्रन्थेनालाभात् सामान्यलाभस्य यावद्विशेषव्यक्तिलाभपूर्वकत्वादिति वाच्यम्; व्यतिरेकपदव्यत्यासेन दीधितिकारैस्तद्ग्रन्थस्य व्याख्यानात्। तथा हि यस्य व्यतिरेकसंशयनिश्चयौ, यत्प्रतिबन्धकावित्येवंरूपेण मूलस्थपङ्क्तेः पर्यवसानादव्यभिचारव्यतिरेकसंशयत्वेन च प्रदर्शितस्याप्यव्यभिचारव्यतिरेकज्ञानस्य ग्रहणसम्भवेन यावद्विशेषलाभेन सामान्यतो यद्व्यतिरेकज्ञानत्वेन प्रतिबन्धकताया लाभसम्भवादिति ध्येयम्।

अथैवं यद्व्यतिरेकज्ञानत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावद् यत्तन्निनिश्चयजन्यमिति दीधितिकारीयपर्यवसितव्याप्तौ व्यभिचारः स्यात्, अव्यभिचारव्यतिरेकज्ञानप्रतिबध्येऽव्यभिचारनिश्चये अव्यभिचारनिश्चयजन्यत्वाभावादिति चेत्, न। तन्मते व्यभिचारसंशयस्य व्याप्तिनिश्चयेऽप्रतिबन्धकतयाऽव्यभिचारनिश्चयेऽव्यभिचारव्यतिरेकज्ञानत्वेन प्रतिबन्धकताया एव कल्पयितुमयोग्यत्वात्। तथा चाव्यभिचारनिश्चयाजन्येऽव्यभिचारनिश्चयेऽव्यभिचारव्यतिरेकज्ञानत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यताया विरहादव्यभिचारो बोध्यः। न चैवं घटवत्तासंशयाप्रतिबध्ये घटवत्तानिश्चये व्यभिचाराद् ग्राह्याभावावगाहिज्ञानस्य ग्राह्यवत्ताज्ञानप्रतिबन्धकतायां निश्चयत्वस्यावच्छेदकत्वेऽपि व्यभिचारसंशयस्य स्वातन्त्र्येण मणिमन्त्रादिन्यायादव्यभिचारात्मकव्याप्तिनिश्चये प्रतिबन्धकत्वमस्त्येव। तथा च अव्यभिचारनिश्चयाजन्येऽव्यभिचारनिश्चये स्वातन्त्र्येणाव्यभिचारव्यतिरेकज्ञानत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतासत्त्वाद्व्यभिचारोऽस्त्येवेति वाच्यम्। अन्योन्याभावादिगर्भव्याप्तिनिश्चये अत्यन्ताभावगर्भव्यभिचारज्ञानस्याप्रतिबन्धकत्वमङ्गीकुर्वतां दीधितिकाराणां मते व्यभिचारज्ञानत्वेन मणिमन्त्रादिन्यायेन प्रतिबन्धकत्वकल्पनाया असम्भवात्। तथा सति अत्यन्ताभावगर्भव्यभिचारज्ञानानामपि स्वातन्त्र्येण मणिमन्त्रादिन्यायादन्योन्याभावगर्भव्याप्तिनिश्चये प्रतिबन्धकताया अवश्यमेव कल्पयितव्यत्वेन तादृशव्याप्तिनिश्चये तादृशव्यभिचारज्ञानस्याप्रतिबन्धकत्वोक्तेरुन्मत्तप्रलपितत्वापत्तेरिति ध्येयम्।

न चैवं मणिकारेण व्याप्तिग्रहोपाये व्यभिचारसंशयस्य व्याप्तिनिश्चयं प्रति यन्मणिमन्त्रादिन्यायेन प्रतिबन्धकत्वमुक्तं तेनेदं दीधितिकारीयव्याख्यानं विरुद्धमिति

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तत्सन्देहे सत्यर्थसन्देहेन अर्थानिश्चयादेवाप्रवृत्तेस्तत्र तयोरप्रतिबन्धकत्वादिति चेत्, न ।

वाच्यम्, तत्र मतान्तरेणैव **मणिकाराणां** व्यभिचारसंशयस्य व्याप्तिनिश्चयप्रतिबन्धकत्वोक्तेर्विरोधाभावात् । एवञ्च दीधितिकारमतानुसारेणेष्टसाधनताज्ञानधर्मिकप्रमात्वव्यतिरेकज्ञानत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावत्त्वात्मकस्य हेतोः प्रवृत्तौ स्वरूपासिद्धत्वेन न तेन हेतुना बहुवित्तायाससाध्यस्थलीयप्रवृत्ताविष्टसाधनताज्ञानधर्मिकप्रमात्वनिश्चयजन्यत्वं प्रमाणितं भवतीति फलितम् ।

एतन्मते व्याप्यत्वव्यतिरेकज्ञानत्वेनापि नानुमितिप्रतिबन्धकत्वं मणिमन्त्रादिन्यायेन स्वतन्त्रं कल्पितमस्ति । व्याप्तिव्यतिरेकनिश्चयस्य बाधमुद्रया व्याप्तिबुद्धौ प्रतिबन्धकत्वसत्त्वात्तादृशव्यतिरेकनिश्चयदशायां व्याप्तिज्ञानाभावादेवानुमितेरनुत्पादः स्यात्, व्याप्तिसंशयदशायाञ्च विपक्षबाधकतर्कानवतारपर्यन्तं तत्संशयानामेव धारोत्पत्स्यते । तथा च व्याप्तिनिश्चयात्मकहेतोरभावादेवानुमित्यनुत्पादस्य निर्वाहो बोध्यः । सति च विपक्षबाधकतर्के संशयसामग्र्या विघटनादनन्तरं स्वकारणादेव व्याप्तिनिश्चयः स्यात्, ततोऽनुमितिरपि समुत्पद्यत एवेति भावः ।

इष्टसाधनताज्ञानधर्मिकप्रमात्वसंशयस्य प्रमात्वव्यतिरेकनिश्चयस्य च यदि प्रवृत्तिं प्रति प्रतिबन्धकता स्यात्तदैव पूर्वोक्तसामान्यव्याप्त्या प्रवृत्ताविष्टसाधनताज्ञानधर्मिकप्रमात्वनिश्चयस्य कारणत्वं प्रमाणितं स्यात् । इदानीं ग्रन्थकारः प्रमात्वसंशयतद्व्यतिरेकनिश्चययोः प्रवृत्तिप्रतिबन्धकत्वं निरस्य प्रवृत्तौ प्रमात्वनिश्चयजन्यत्वसाधकमनुमानं निषेधति—**तत्सन्देहे सत्यर्थसन्देहेनेत्यादिना** ।

ननु प्रवृत्तौ तद्विषयधर्मिकेष्टसाधनतानिश्चये प्रमात्वसंशयादेर्यदि तां प्रति प्रतिबन्धकत्वं न स्यात्, तदा तादृशनिश्चयधर्मिकप्रमात्वसंशयादेः सत्त्वे तत्र प्रवृत्तिरुत्पद्यतां बाधाभावादिति चेत्, न, इत्याह—**अर्थानिश्चयादेवाप्रवृत्तेस्तत्रेत्यादि** । तथा हि इष्टसाधनतानिश्चयधर्मिकाप्रामाण्यज्ञानस्य स्वविषयीभूतज्ञानीयविषये इष्टसाधनत्वस्य संशायकत्वेन कारणीभूतस्येष्टसाधनत्वनिश्चयस्याभावादेव बहुवित्तायाससाध्येऽप्रवृत्तिरुपपद्यत इति न तदर्थं प्रमात्वसंशयतद्व्यतिरेकनिश्चययोः स्वातन्त्र्येण प्रवृत्तिं प्रति प्रतिबन्धकत्वं कल्पनीयमिति भावार्थः ।

न च प्रमात्वसंशयादिस्थले प्रवृत्त्यनुत्पादस्योभयवादिसिद्धत्वेन तस्य चानुत्पादस्य प्रमात्वसंशयादेः प्रतिबन्धकत्वकल्पनयापि निर्वाहसम्भवे प्रदर्शितमूलग्रन्थस्य प्रमात्वसंशयादेरप्रतिबन्धकत्वव्यवस्थापकत्वमसङ्गतमिति वाच्यम्, स्वाभावेतरसकलकारणसत्त्वे यत्सत्त्वे यस्य कार्यस्यानुत्पादः, तस्यैव तत्कार्यं प्रति प्रतिबन्धकतायाः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

शास्त्रविद्भिरभिप्रेतत्वात् । प्रकृतस्थले चार्थनिश्चयरूपस्य कारणविशेषस्याभावादेव प्रवृत्त्यनुत्पादस्य व्यवस्थापनसम्भवेन न तेन प्रमात्वसंशयादेः प्रवृत्तिप्रतिबन्धकत्वं व्यवस्थापितं भवति ।

अथेष्टसाधनत्वनिश्चयधर्मिकप्रमात्वसंशयादिस्थले ग्रन्थकृता यदप्रवृत्तेरुप-स्थापनं कृतं तदसङ्गतम् । इच्छादिघटितसामग्र्या इव इच्छासामग्र्या अपि तदितर-सामग्रीतोऽधिकबलत्वात् । तथा हि, इष्टसाधनतानिश्चयस्येच्छां प्रति पर्याप्तकारणत्वेन तदनन्तरमिच्छैवोत्पद्येत, न त्विष्टसाधनतानिश्चयधर्मिकप्रमात्वसंशयादिकम् । इच्छा-यामुत्पन्नायां प्रवृत्तिरपि तदनन्तरं स्यादेव । तथा चावसराभावात्तादृशस्थले प्रमात्वसंशयादिकमनुपपन्नमेवेति चेत्, न । यत्र प्रथमं भाविज्ञानमप्रमेत्यप्रामाण्यज्ञान-मनन्तरमिष्टसाधनतानिश्चयस्तादृशस्थले इच्छासामग्र्या अभावेनाप्रवृत्तेः सम्भव-दुक्तिकत्वात् । यद्यपि प्रथमं भाविज्ञानमप्रमेत्यप्रामाण्यज्ञानमनन्तरं निश्चय इत्येवं-क्रमेण ज्ञानादीनामुत्पत्तिः प्रायशो न दृश्यते, तथापि बाधकाभावेन तादृशस्यापि ज्ञानाद्युत्पत्तिक्रमस्य कल्पयितुं शक्यत्वादिति ध्येयम् ।

न चान्वयव्यतिरेकानुविधानस्य कारणताग्राहकत्वाद् इष्टसाधनतानिश्चय-धर्मिकप्रामाण्यसंशयाद्यभावस्य चार्थनिश्चयस्यैव प्रवृत्तौ नियतान्वयव्यतिरेकानुविधा-यित्वादवश्यमेव कारणत्वं स्यादेवञ्च कारणीभूताभावप्रतियोगित्वेन प्रामाण्यसंश-यादेः प्रवृत्तिप्रतिबन्धकत्वस्यावश्यं स्वीकरणीयत्वादप्रतिबन्धकत्वकथनमसङ्गतमिति वाच्यम्, अवश्यक्लृप्तकारणताकेनार्थनिश्चयेन प्रामाण्यसंशयाद्यभावस्य प्रवृत्ता-वन्यथासिद्धत्वात् । प्रामाण्यसंशयाद्यभावस्य प्रवृत्तौ कारणत्वस्वीकारेऽप्यर्थ-निश्चयस्यावश्यमेव तत्र कारणत्वं स्वीकार्यमन्यथार्थनिश्चयासत्त्वेऽपि प्रामाण्यसंशयाद्य-भावदशायां प्रवृत्त्युत्पत्त्यापत्तेर्वज्रलेपत्वात् । तथा चार्थनिश्चयस्य प्रवृत्तिहेतुत्व-मवश्यक्लृप्तमिति तेनान्यथासिद्धत्वान्नियतान्वयव्यतिरेकानुविधायित्वेऽपि प्रामाण्य-संशयाद्यभावस्य प्रवृत्तावकारणत्वमेवं कारणीभूताभावप्रतियोगित्वरूपं प्रतिबन्धक-त्वमपि प्रामाण्यसंशयादेर्निरस्तमेवेति बोध्यम् ।

न च पूर्वोक्तयुक्त्या प्रामाण्यसंशयादेः प्रवृत्तावप्रतिबन्धकत्वे भाविज्ञानम-प्रमेत्याद्यप्रामाण्यज्ञानानन्तरोत्पन्नादर्थनिश्चयाद् विषयसंशयोत्पत्तिक्षणे तं बाधित्वा प्रवृत्तिरुत्पद्यतां प्रवृत्तिकारणस्यार्थनिश्चयस्य पूर्वं सत्त्वादिति वाच्यम्, अप्रामाण्य-ज्ञानानास्कन्दितस्यैवार्थनिश्चयस्य प्रवृत्तौ कारणत्वाभ्युपगमात् ।

न चैवं प्रामाण्यसंशयादेः प्रवृत्तिप्रतिबन्धकत्वमावश्यकमेव । अर्थनिश्चयगत-प्रवृत्तिकारणतायामवच्छेदककोटिप्रविष्टाप्रामाण्यज्ञानाभावस्य प्रवृत्तिप्रयोजकत्वेन तत्प्र-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रामाण्यसंशयानन्तरं 'इदमित्थमेव' इत्यवधारणस्य निष्कम्पप्रवृत्त्यङ्गस्य प्रामाण्यनिश्चयाधीनत्वात् ।

तियोगित्वस्याप्रामाण्यज्ञाने प्रामाण्यसंशयतद्व्यतिरेकनिश्चयात्मके सत्त्वादिति प्रयोजकीभूताभावप्रतियोगित्वस्यापि प्रतिवन्धकत्वादिति वाच्यम्, कारणीभूताभावप्रतियोगित्वस्यैव प्रतिबन्धकत्वस्वरूपत्वस्वीकारात् । प्रदर्शितस्याप्रामाण्यज्ञानाभावस्य कारणतावच्छेदकत्वेन प्रवृत्तिप्रयोजकत्वेऽपि तां प्रत्यकारणत्वात् ।

इदानीं प्रवृत्तिविशेषे प्रामाण्यनिश्चयस्यापेक्षामभ्युपगमवादेनोररीकृत्य समाधातुमुपक्रमते । **प्रामाण्यसंशयानन्तरमिदमित्थमेवेत्यवधारणस्य निष्कम्पप्रवृत्त्यङ्गस्य प्रामाण्यनिश्चयादित्यादि** । भाविज्ञानमप्रमेत्यप्रामाण्यज्ञानानन्तरमुत्पन्नस्येष्टसाधनतानिश्चयस्योत्तरं तदेव पुनरिष्टसाधनताया निश्चयः स्यात्, यदि पूर्वोक्तनिश्चयधर्मिणि कदाचित् प्रामाण्यस्य निश्चयः समुत्पन्नः स्यात् । तथा चेष्टसाधनताज्ञानधर्मिकप्रामाण्यसंशयानन्तरोत्पन्नप्रवृत्तिस्थले कारणीभूतेष्टसाधनतानिश्चयस्योत्पत्त्यर्थं प्रामाण्यनिश्चयस्यावश्यमपेक्षणीयत्वेन प्रामाण्यनिश्चयासम्भवे ग्रन्थाध्ययनप्रवृत्त्यसम्भवेन स्वाध्ययनाधीनपदार्थतत्त्वज्ञानजन्यत्वरूपसम्बन्धस्य निःश्रेयसे असत्त्वेन फलासम्बद्धत्वाच्छास्त्रमनादरणीयमिति पूर्वपक्षाभिप्रायः ।

यदिदमुक्तं ग्रन्थकृद्भिः प्रामाण्यसंशयानन्तरमुत्पन्नायां निष्कम्पप्रवृत्तावर्थनिश्चयद्वारा प्रामाण्यनिश्चयस्यापेक्षा वर्तते तदिदानीं परीक्ष्यते । प्रवृत्तावुपयोगित्वेन योऽयमर्थनिश्चयो ग्राह्यः स खलु इष्टसाधनतानिश्चयात्मक एव स्यात्, तद्वहिर्भविणार्थनिश्चयस्य प्रवृत्तावनुपयोगात् । यस्मिन् ज्ञानधर्मिणि प्रामाण्यस्य संशयः स्यात्, तत् खलु ज्ञानं निश्चयात्मकमेव स्यात्, संशयात्मके ज्ञाने प्रामाण्यसन्देहस्यानतिप्रयोजनकत्वात् ।

तथा हि रजतमिदं मदिष्टसाधनमित्याकारकस्यार्थनिश्चयस्य प्रथममुत्पत्ताविच्छाचरमकारणस्योपस्थितत्वेनेच्छाघटितसामग्र्या इवेच्छासामग्र्या अपि सर्वतो वलवत्त्वेन सत्यामपि ज्ञानधर्मिकाप्रामाण्यज्ञानसामग्र्यामप्रामाण्यज्ञानं बाधित्वा तादृशार्थनिश्चयानन्तरमिच्छैवोत्पद्यतेतराम् । ततश्च तत्र विनैव प्रामाण्यनिश्चयं प्रवृत्तिरप्युत्पद्येतेति न तत्स्थलं प्रामाण्यसंशयानन्तरकालीनप्रवृत्तौ दृष्टान्तत्वेन ग्रहणयोग्यम् ।

यत्र च भाविज्ञानमप्रमेत्यप्रामाण्यनिश्चयानन्तरं प्रकृतशास्त्राध्ययनं मोक्षसाधनमित्येवमिष्टसाधनतानिश्चयस्तत्रेष्टसाधनतानिश्चयस्याऽप्रामाण्यज्ञानानास्कन्दितत्वा-

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

भाववत्त्वेनेच्छात्मकफलोपधानाभावादेव तादृशस्थले प्रवृत्त्युत्पत्तेरनापाद्यत्वमिच्छायाः प्रवृत्तिजनकत्वस्य सर्ववादिसम्मतत्वात्, प्रदर्शितस्थलस्याप्रामाण्यसंशयासम्बलितत्वाच्च। तथा च न तत्स्थलमप्रामाण्यसंशयानन्तरकालीनप्रवृत्त्युपयोगित्वेन ग्रहीतुं शक्यम्। यदि च भाविज्ञान प्रमा न वेत्याकारकः प्रामाण्यसंशयो गृह्येत, तदापीच्छाभावादेवाप्रवृत्तिनिर्वाहेण प्रामाण्यसंशयानन्तरकालीनप्रवृत्तावर्थनिश्चायकत्वेन प्रामाण्यनिश्चयस्यावश्यकत्वप्रदर्शनमसम्भवमेव स्यादिति चेत्, न, प्रामाण्यसंशयानन्तरमित्यादिग्रन्थेन प्रामाण्यसंशयानन्तरमिच्छोत्पत्तिकारणीभूतार्थनिश्चये प्रामाण्यनिश्चयापेक्षाद्वारा तादृशस्थलीयप्रवृत्तावर्थनिश्चये प्रामाण्यनिश्चयापेक्षाया एव विवक्षितत्वात्। एतादृशमपि स्थलं नानायासेनानुभविकमित्यभ्युपगमवादेनैव मणिकृद्भिः प्रवृत्तौ प्रामाण्यनिश्चयापेक्षाकथनमिति ध्येयम्।

ननु **तत्सन्देहे सत्यर्थसन्देहेनार्थानिश्चयादेवाप्रवृत्तेस्तत्र तयोरप्रतिबन्धकत्वा**दित्यनेन ग्रन्थेन इष्टसाधनताज्ञानधर्मिकप्रामाण्यनिश्चयस्य बहुवित्तायाससाध्यस्थलीयप्रवृत्तावपि यद् हेतुत्वमुक्तं तदसमीचीनमिव प्रतिभाति। तथा हि यागः स्वर्गसाधन इत्याद्याकारकशाब्दज्ञाने यदा प्रामाण्यसन्देहस्तदाप्यर्थनिश्चयस्य सत्त्वेन यागे पुरुषस्य प्रवृत्तिरापद्यते। अतस्तदापत्तिवारणार्थं प्रामाण्यनिश्चयस्यावश्यं प्रवृत्तिविशेषे हेतुत्वमावश्यकम्। एवञ्च प्रदर्शितस्थले प्रामाण्यनिश्चयात्मककारणस्यानुपस्थित्यैव प्रवृत्त्यापत्तेर्वारणं सुकरं स्यात्। न चाप्रामाण्यज्ञानाभावस्यार्थ अर्थनिश्चयस्येव पृथक्कारणत्वकल्पनादेव तत्र प्रवृत्त्यापत्तेर्निरासस‌म्भवे तदर्थं प्रामाण्यनिश्चयस्य कारणत्वकल्पनमनावश्यकमिति वाच्यम्, तदभाववद्विशेष्यकत्वनिरूपिततत्प्रकारकत्वघटितस्याप्रामाण्यस्याभावघटितत्वेन तदभावस्य कारणत्वेऽधिकाभावघटितत्वेन गौरवापत्तेस्तदपेक्षया लघुतरस्य प्रामाण्यनिश्चयस्यैव प्रवृत्तिविशेषे कारणत्वस्यावश्यकत्वात्।

न च तद्वन्निष्ठविशेष्यकत्वनिरूपिततन्निष्ठप्रकारकत्वघटितप्रामाण्यशरीरेऽभावस्याप्रवेशेऽपि निश्चयत्वस्य संशयान्यत्वघटिततया संशयत्वस्य चान्तर्निविष्टाभावकतया निश्चयस्यापि अप्रामाण्यज्ञानाभावसमशरीरत्वमिति कुतो लाघवमिति वाच्यम्, सम्भावनत्वाख्यविषयताविशेषघटितत्वेन संशयत्वस्य तच्छरीरेऽभावस्याप्रवेशेन निश्चयत्वेन कारणत्वे लाघवानपायात्।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु स्वत एवास्तु तन्निरूपणम् । तथा हि तत्र विप्रतिपत्तयः ।

स्वतःप्रामाण्यवादिनां मतमाश्रित्य समाधातुमाह ननु स्वत एवास्तु इत्यादि । तथा च प्रामाण्यविनिश्चयस्य स्वत एवोत्पादसम्भवादध्ययनप्रवृत्तिहेताविष्टसाधनताज्ञाने प्रामाण्यनिश्चयसत्त्वेनाधिकारिणः शिष्यस्य प्रमाणादिषोडशपदार्थतत्त्वविज्ञानद्वारा चरमदुःखध्वंसात्मकस्यापवर्गस्य सिद्धौ सिद्धो भवति शास्त्रस्य प्रयोजनेनाभिसम्बन्ध इति ग्रन्थाभिप्रायः ।

स्वत इति पदं सर्वनामसु परिगणितात् स्वपदात् पञ्चम्यन्तात् तसिल्प्रत्ययेन व्युत्पन्नमिति साम्प्रदायिकाः, 'स्वतः स्वस्मात् स्वकीयात्' इति दीधितौ तथैव व्याख्यानात् । अथ सर्वनामसंज्ञकप्रातिपदिकानां पूर्वपरामृष्टार्थाभिधायकत्वं तैर्थिकेषु प्रसिद्धमास्ते । कदा कस्य तीर्थकरस्य किं परामृष्टमस्ति तत् खलु तदीयपङ्क्तिपर्यालोचनयैव निर्णीतं स्यादुपायान्तरस्याभावात् ।

प्रकृते च मणिग्रन्थस्थमिदं स्वपदम्, अतो मणिकारपरामृष्टमेव किञ्चिदभिदध्यात् । किञ्चात्र वस्तु मणिकृत्परामृष्टमस्ति, तदपि सन्निहितया मणिपङ्क्त्यैव निर्धारितं स्यात् । द्वेऽत्र सन्निहिते मणिपङ्क्ती दृश्येते । तद्धि प्रमातत्त्वावधारणाधीनं तच्च स्वतः परतो वा न सम्भवतीत्यधस्तादुक्ता एका । ननु स्वत एवास्तु तन्निरूपणमित्यपराव्यवहिता । प्रथमायां प्रमातत्त्वं तदवधारणञ्च मणिकारस्य परामृष्टत्वेन लभ्येते तदनुसारेण च प्रमातत्त्वं तदवधारणं वा स्वपदस्याभिधेयं स्यात् ।

एतद् द्वयमप्ययुक्तम् । प्रमातत्त्वे तज्ज्ञापकत्वस्य वाद्यनभिप्रेतत्वात् प्रमातत्त्वावधारणस्य च प्रमातत्त्वनिश्चयात्मकस्य प्रमात्वनिर्णयप्रयोजकत्वासम्भवादभेदे प्रयोज्यप्रयोजकभावानङ्गीकारात् । द्वितीयपङ्क्तावपि प्रमात्वस्य तदवधारणात्मकतन्निरूपणस्य वा पङ्क्तिकृतो बुद्धिस्थत्वेन तद्दोषानपायादिति चेत्, न, स्वपदस्यात्र स्वतःप्रामाण्यवादिनां बुद्धिस्थवस्तुपरामर्शकत्वेन सर्वसामञ्जस्यात् । प्राभाकराः खलु स्वाश्रयेण प्रामाण्यं गृह्यत इति मन्यन्ते । अतः प्रामाण्याश्रयीभूतज्ञानस्यैव प्रामाण्यग्राहकत्वेन तेषां बुद्धिस्थत्वादत्रापि तद्बुद्धिस्थतोपलक्षितज्ञानत्वविशिष्ट एव स्वपदस्य वृत्तिर्बोध्या । भट्टमिश्रयोर्मते स्वाश्रयग्राहकेन ज्ञानेन प्रामाण्यग्रहाङ्गीकारात् तयोर्मते प्रामाण्याश्रयग्राहकज्ञानस्यैव बुद्धिस्थत्वात् तदुपलक्षितज्ञानत्वविशिष्टे स्वपदस्य वृत्तिराश्रयणीयेति ध्येयम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

साङ्ख्यमते वेदान्तमते च यथा द्रव्यादिपदार्थसप्तकेभ्यो विजातीयः स्वप्रकाश-चैतन्यात्मकः पदार्थविशेषः स्वीकृतोऽस्ति। **प्राभाकरभाट्ट**मतयोस्तु तादृशः कोऽपि पदार्थो नाङ्गीकृतो दृश्यते, तयोर्मतयोश्चैतन्यस्य निर्विषयत्वान्न्यायादिमतसिद्धज्ञान-पदार्थतस्तस्य वैजात्यं बोध्यम्। **न्यायादिमते** ज्ञानस्य सविषयकत्वनियमात् तन्मतयो-श्चैतन्यस्य स्वभावतो विषयासंसर्गित्वाद् गुणजात्यादिभिरयुक्तत्वाच्चैतन्यस्य द्रव्य-गुणकर्मस्वनन्तर्भावो बोध्यः। असमवेतत्वाच्चैतन्यस्य सामान्यविशेषाभ्यां विजातीयत्वं निष्प्रतियोगिकत्वात् समवायतः सद्रूपत्वाच्चाभावतश्चैतन्यस्य वैलक्षण्यं बोध्यम्। तच्चैतन्यं **साङ्ख्यमते 'पुरुषनाम्ना', वेदान्तमते** च **'ब्रह्मनाम्ना'** व्यवह्रियमाणं दृश्यते। तत्तन्मते च चैतन्यस्य स्वयम्प्रकाशरूपत्वमङ्गीकृतमस्ति। स्वयम्प्रकाशत्वञ्च चैतन्यस्य स्वभिन्नप्रकाशनैरपेक्ष्येण प्रकाशमानत्वरूपं बोध्यम्।

यद्यपि **प्राभाकरमतेऽसङ्गं** निर्विषयञ्च व्याख्यातस्वरूपं चैतन्यात्मकं वस्तु नाङ्गीकृतमस्ति, तथापि स्वयंप्रकाशात्मकं वस्तु स्वीकृतमस्ति। प्राभाकरमते ज्ञानं खलु सविषयकमपि गुणपदार्थेऽन्तर्भूतमपि स्वभिन्नप्रकाशनैरपेक्ष्येण प्रकाशमानतया स्वयं ज्योतिःस्वरूपमेव। साङ्ख्यवेदान्तनययोश्चैतन्यमिव प्राभाकरमते ज्ञानं स्वप्रकाश-स्वरूपं स्वीकृतमस्ति। ज्ञानस्य स्वयंप्रकाशत्वे तस्य निर्विषयत्वासम्भवे च स्वप्रकाश-दशायां तदीया विषया अप्यवश्यमेव प्रकाशिता भवेयुरिति तस्य विषयप्रकाशात्मकत्व-मवर्जनीयं भवति। एतन्मते ज्ञानं स्वीयसविषयकत्वेनेव यथासम्भवं प्रमात्वेनापि सहैव प्रकाशितं भवतीति विषयकत्वस्येव प्रमात्वस्यापि स्वीयप्रकाशे स्वाश्रयातिरिक्तानपेक्षणात् स्वतःप्रकाशत्वं स्वीकृतमस्ति।

भाट्टमते ज्ञानं खलु आत्माश्रितो गुणविशेषः। तदेव चैतन्योपलब्धिबुद्धिप्रभृति-नाम्ना व्यवह्रियते। न तु साङ्ख्यवेदान्तसम्मतं चैतन्यमिव किञ्चिद् द्रव्यादिविलक्षणं निर्धर्मकं वस्तु भाट्टमते स्वीकृतमस्ति। ज्ञानस्य गुणपदार्थेऽन्तर्भावात् सविषयकत्वाच्च तत्तन्मतसम्मतचैतन्यपदार्थाद्वैलक्षण्यं तस्य बोध्यम्। एतन्मते ज्ञानस्य स्वयंज्योतिष्ट्वं स्वीकृतं नास्ति। एवमपि विषयप्रकाशात्मकत्वं तस्य भाट्टैरङ्गीकृतम्। तदात्मकत्वाभावे ज्ञानत्वस्यैव व्याहतेः। विषयप्रकाशात्मकस्य ज्ञानगुणस्य भाट्टमते स्वयंज्योतिष्ट्व-मनुव्यवसायगम्यत्वं वाङ्गीकृतं नास्ति। तन्मते ज्ञानमनुमानेन सिद्धं भवति।

मूलकृता विचाराङ्गविप्रतिपत्त्युपस्थापने या रीतिरवलम्बिता, तत्र प्रथमस्थले विधिकोटौ गुरुमिश्रभाट्टमतानि अनुगतरूपेण गृहीत्वा तन्निषेधेन तत्र न्यायमत-माविष्कृतम्। उक्तमतत्रये आत्मस्वरूपे ज्ञानतत्प्रामाण्ययोः प्रकाशे च परस्परं

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

वैषम्यमस्ति। तानि मतान्यपि न न्यायादिमतवत् सुप्रसिद्धानि। अतो विप्रतिपत्ति-वाक्यव्याख्यातुकामैरस्माभिस्तत्तन्मतानुसारेण आत्मा, ज्ञानम् तद्गतप्रामाण्यावगम-रीतिश्च सप्रमाणमुट्टङ्क्यते। प्राभाकरमते आत्मानः प्रतिक्षेत्रं भिन्नभिन्ना वर्तन्ते। नाद्वैतिनामिव सर्वक्षेत्रेषु तेषामभेदः। नापि ते स्वप्रकाशाः प्राभाकरैः सुषुप्त्यवस्थाया-मात्मप्रकाशस्यापि सर्वथाऽस्वीकारात्। स्वयंज्योतिष्ट्वे सुषुप्तावपि आत्म-प्रकाशापत्तेः। स्वाभाविकस्य आवरणाभिभवयोरसम्भवात्। अतः प्राभाकरमते आत्मस्वरूपं सर्वथा न्यायमतानुरूपम्। ज्ञानगुणवत्त्वेन द्रव्यत्वमपि तेषां नैयायिकाना-मिव सम्मतम्। ज्ञानस्वरूपे तु प्राभाकराणां भट्टनैयायिकाभ्यां वैमत्यमस्ति। तथा हि न्यायमते भाट्टमते च स्वप्रकाशत्वम् अन्यानपेक्षप्रकाशत्वरूपमलीकमेव। तत्तन्मते तादृशं वस्त्वेव नास्ति, यदन्यनैरपेक्ष्येण प्रकाशते।

प्राभाकरमते तु ज्ञानं यद्यपि बुद्ध्युपलब्धिभ्यां नैयायिकानामिवानर्थान्तरम्, तथापि तत् स्वप्रकाशस्वरूपम्। उत्पत्तिक्षणादेव स्वान्यनैरपेक्ष्येण यावदवस्थानं प्रकाशत एव। बुद्धेरपि सापेक्षप्रकाशात्मकत्वे जगदान्ध्यप्रसक्तेः। तथा च बुद्धि-प्रकाशकबुद्धेरपि तत्प्रकाशकज्ञानान्तरात् प्रकाशे आप्रलयमेकस्या बुद्धेः प्रकाशार्थमनन्त-बुद्धिकल्पनायां प्रथमोत्पन्नाया बुद्धेरिदानीमप्यप्रकाशेन प्रलयपर्यन्तं कस्यापि वस्तुनः प्रकाशो न सम्भवति।

प्राभाकरमतसिद्धा संवित् स्वयंप्रकाशापि साङ्ख्यवेदान्तसम्मतचैतन्यादि-विलक्षणैव। एतन्मते तस्या आत्मद्रव्यसमवेतत्वेनोत्पादविनाशप्रतियोगिगुणस्वा-भाव्याङ्गीकारात्। तत्तन्मते च चैतन्यस्यानुत्पन्नविनाशित्वेनागुणस्वाभाव्येन च सिद्धा-न्तितत्वात्। विषयाप्रकाशकत्वे संवित्त्वमेव व्याहन्येतेति संविदो विषयप्रकाशात्मकत्व-मवश्यमङ्गीकार्यम्। अतः प्राभाकरमतेन संविदां विषयप्रकाशकत्वं स्वप्रकाशकत्वं स्वप्रकाशात्मकत्वञ्च सिद्धम्। आश्रयाप्रकाशेऽनात्मभूतायाः संविदः प्रकाशेऽपि कस्येय-मित्यनिर्णयाद् घटादिवदात्मापि अवश्यं संविदि जायमानायां प्रकाशतैव। अतः प्राभा-करमते संवित् त्रिपुटीप्रकाशिकेति राद्धान्तः। तद्वति तत्प्रकारकत्वरूपं प्रामाण्यमपि असति बाधकप्रमाणे स्वाश्रयभूतया व्यवसायात्मकतत्तत्संविदा एव प्रकाशितं भवतीति प्राभाकरा मन्यन्ते।

मिश्रमते स्वयंप्रकाशात्मकं वस्तु नास्त्येव। नैयायिकानामिव मिश्रमतेऽपि अनुव्यवसायेन मानसप्रत्यक्षात्मकेन घटपटादिविषयकं व्यवसायात्मकं ज्ञानं प्रकाश्यते।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यं नवा ?

व्यवसायेन घटपटादिविषयाणां प्रकाशाद् अनुव्यवसायेन च व्यवसायात्मकज्ञानप्रकाशात् ताभ्यामेव ज्ञानाभ्यां व्यवहारोपपत्तौ जातायामनुव्यवसायस्य प्रकाशः केन भवतीति पृच्छाया अनवकाशेन तस्य प्रकाशेऽप्रकाशे वा क्षत्यभावात्, न ज्ञानस्य अनुव्यवसाय-प्रकाश्यतावादे अनवस्थया अनिष्टमापतति। एतन्मते आत्मस्वरूपं प्राभाकरमततुल्यम्। ज्ञानानामनात्मत्वमात्मसमवेनगुणत्वञ्च तथैव। अनुव्यवसाये च व्यवसायज्ञानमिव तदाश्रयीभूत आत्मापि तुल्यतया प्रकाशत इति न कस्येदं ज्ञानमिति पृच्छाया अवकाशोऽस्ति। तद्वति तत्प्रकारकत्वरूपं प्रमात्वमपि असति बाधकप्रमाणे अनुव्यवसायादेव निर्णीयत इति तन्मतानुसारेण प्रमात्वस्य स्वतःप्रकाशत्वं बोध्यमिति मिश्राणां सिद्धान्तः।

भाट्टाः खलु स्वयंप्रकाशात्मकं वस्त्वलीकमिति मन्यन्ते। तन्मते प्रमेय-मात्रस्यैव परप्रकाश्यत्वस्वीकारात्। प्राभाकरमताद् मिश्रमताच्चैतन्मते इयान् विशेषः। ज्ञानं न स्वयंज्योतिः, न वा मानसप्रत्यक्षसिद्धम्; ज्ञाततालिङ्गकानुमानेन तस्य अस्तित्वनिर्णयात्, तथा हि घटपटादिविषयकज्ञानं क्रियात्वात् (धात्वर्थत्वात्) स्वविषये घटपटादौ किञ्चित् फलमादधाति। तच्च तन्मते ज्ञाततेति नाम्ना व्यपदिश्यते। ज्ञातता च प्रत्यक्षगम्या। ज्ञाततायाः मानसप्रत्यक्षकाले ज्ञानाश्रयीभूत आत्मापि मानसेनैव प्रत्यक्षेण भासते, घटो मया ज्ञात इत्याद्याकारेण ज्ञाततायाः मनोग्राह्यत्वात्। ज्ञानस्य गुणत्वमनात्मत्वञ्च पूर्वपूर्वमतेन तुल्यमेव। आत्मस्वरूप-मपि पूर्ववदेव बोध्यम्। सुषुप्तौ आत्मनोऽप्यप्रकाशात् न तस्य स्वयंज्योतिष्ट्वं सम्भवति। स्वयंज्योतिष्ट्वप्रतिपादकश्रुतयस्तु आत्मा स्वस्यैव सकाशे प्रत्यक्षतया अवगतो भवति न परेषामित्यर्थे नेतव्याः। ज्ञानञ्च उत्पत्त्यनन्तरं प्रत्यक्षसिद्धया ज्ञाततया लिङ्गेन अनुमितं भवति। ज्ञानानुमानकाले च असति बाधकप्रमाणे तद्वति तत्प्रकारकत्वरूपं प्रमात्वमपि ज्ञातं भवतीति स्वतःप्रकाशत्वं भाट्टा अभिमन्यन्ते।

एतन्मतत्रयसाधारण्येन विधिकोटिमनुगमय्य प्रमात्वस्य स्वतःप्रकाशत्वे विप्रतिपत्तिमाह **ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यं न वा** इत्यादि। अत्र यथाक्रमं पञ्च विप्रतिपत्तयः प्रदर्शिताः। तास्वियं प्रथमा। ज्ञान-प्रामाण्यमिति धर्मिनिर्देशः। तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यत्वरूपा विधिकोटिः प्राभाकरमिश्रभाट्टानां त्रयाणां सम्मता। तादृशसामग्रीग्राह्यत्वाभाव-रूपा निषेधकोटिः नैयायिकवैशेषिकयोरभिप्रेता।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ये तु अप्रामाण्यं स्वतः प्रामाण्यं परतो ग्राह्यमिति बौद्धमतमित्याचक्षते, तेषां मते निषेधकोटिर्बौद्धानामपि सम्मता स्यात्। बौद्धमतस्यैवंरूपता नास्माभिस्तदीयग्रन्थेषु कुत्रापि साक्षादुपलब्धा। अतोऽस्माकं मते पूर्वोक्तमतत्रयसाधारण्येव विधिकोटिरिति सिद्धान्तः। तदप्रामाण्याग्राहकेति विशेषणांशस्य विचारोऽग्रे द्रष्टव्यः। तदंशपरिहारेण च यावज्ज्ञानग्राहकसामग्रीग्राह्यत्वमेव विधिकोटिः स्यात्। ज्ञानग्राहकेति। ज्ञानविषयकज्ञानजनकेति तदर्थः। जनकत्वञ्च सामग्रीविशेषणम्। तथा च यावज्ज्ञानविषयकज्ञानजनकसामग्रीजन्यज्ञानविषयत्वं पर्यवसिता विधिकोटिः।

प्राभाकरमते ज्ञानस्य स्वयंज्योतिष्ट्वात् व्यवसायात्मकं ज्ञानमेव ज्ञानविषयकज्ञानत्वेन गृहीतं स्यात्। तज्जनिका च सामग्री व्यवसायोत्पादिका सामग्री एव। तादृशसामग्रीजन्यज्ञानत्वेनापि तदेव व्यवसायात्मकं ज्ञानं गृहीतं स्यात्। तद्विषयत्वस्य व्यवसायगतप्रामाण्ये सत्त्वात्, प्राभाकरमतानुसारेण ज्ञानप्रमात्वे विधिकोटेः प्रसिद्धिर्बोध्या।

विप्रतिपत्तौ चतुर्धा ज्ञानस्य प्रवेशो दृश्यते। द्विर्ज्ञानपदाभ्यां द्विश्च ग्रहपदाभ्याम्। ज्ञानप्रामाण्यमिति धर्मिकोटौ ज्ञानपदेन विधिकोटौ यावज्ज्ञानग्राहकेति ज्ञानपदेन तत्रैव च ग्राहकेतिपदान्तर्गतग्रहधातुना तत्रैव च पुनः ग्राह्यपदान्तर्गतग्राहिणा। तेषु धर्मिकोटौ ज्ञानत्वेन ज्ञानप्रवेशस्य व्यावृत्तिर्विचार्यते। तस्यात्रवेशे प्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यं न वेत्याकारेण विप्रतिपत्तिः पर्यवसिता भवति।

एवञ्च सति प्रमाणपदस्य करणल्युटा भावल्युटा च व्युत्पत्तिसम्भवेन तत्रापि च करणार्थं एव बहुलव्यवहारात् प्रामाण्यपदेन प्रमाकरणत्वं प्रथमतो गृहीतं भवति। करणत्वञ्च असाधारणकारणत्वे पर्यवसितमिति तद् इन्द्रियतत्सन्निकर्षादौ विद्यते। तादृशप्रामाण्यस्य प्राभाकरैर्ज्ञानग्राहकसामग्रीग्राह्यत्वानङ्गीकाराद् धर्मिणि तन्मतेन प्रदर्शितं स्वतोग्राह्यत्वं बाधितं भवतीति प्रामाण्यविशेषणतया ज्ञानपदेन ज्ञाननिष्ठत्वमुपस्थापितम्। ज्ञानस्य प्रामाण्यमिति षष्ठीसमासनिष्पन्नत्वेन ज्ञानप्रामाण्यपदान्तर्गतं ज्ञानपदं ज्ञाननिष्ठार्थे लाक्षणिकम्। एवञ्च सति ज्ञाननिष्ठप्रामाण्यस्य धर्मितया पर्यवसानात् प्रामाण्यपदं भावव्युत्पत्त्या निष्पन्नत्वेनावश्यं ग्रहणीयम्। तथा च प्रमात्वमेव विप्रतिपत्तौ धर्मित्वेन पर्यवसितं भवति प्रमात्वात्मकप्रामाण्यस्य प्राभाकरैः ज्ञानग्राहकसामग्रीग्राह्यत्वाङ्गीकारात् तन्मते बाधपरिहारो बोध्यः।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यद्यपि ज्ञानपदमपि भावल्युटा करणल्युटा च व्युत्पन्नं भवितुमर्हति, तथापि प्रसिद्ध्यनुसारेण भावार्थकत्वमेव तत्पदस्य ग्रहणीयतया तत्समानाधिकरणप्रामाण्यपदस्यापि भावार्थ एव अवश्यं ग्राह्यत्वाद् ज्ञानपदसन्निधानात् प्रमात्वरूपमेव प्रामाण्यं विप्रतिपत्तौ धर्मीति बोध्यम् ।

नन्वेवमपि व्याप्तिज्ञानपदश्रवणादिगतानुमितिशाब्दादिकरणत्वस्य ज्ञानगतत्वाद् धर्मिणि प्रविष्टतया तादृशप्रमाकरणत्वस्य प्राभाकरादिभिरपि स्वतोग्राह्यत्वानङ्गीकाराद् अंशतो बाधस्तदवस्थ इति तत्परिहारार्थं प्रामाण्यपदस्य प्रमात्वार्थकत्वमवश्यं ग्राह्यम् । एवञ्च धर्मिणि ज्ञानपदमव्यावर्तकमिति वाच्यम् ।

अत्रोच्यते । तद्वति तत्प्रकारकत्वं विशेष्यावृत्त्यप्रकारकत्वम्, अबाधितानधिगततार्थविषयकत्वं चेति भिन्नं भिन्नं प्रमात्वं स्वीकृतमस्ति । एषान्तु केवलं तद्वति तत्प्रकारकत्वरूपं प्रमात्वमेव प्राभाकरादिमते स्वतोग्राह्यम् । अन्येषां नानाविशेषणघटितत्वेन पूर्वोत्पन्नविशेषणज्ञानसापेक्षग्राह्यतया स्वतोग्राह्यत्वासम्भवात् । तद्वति तत्प्रकारकत्वञ्चाविसंवादिन्यामिच्छायामपि अस्ति । इच्छागतस्य च तस्य तादृशप्रामाण्याश्रयेच्छाग्राहकेणाग्रहणाद् बाधवारणार्थं तद्वति तत्प्रकारकत्वस्य ज्ञाननिष्ठत्वेनावश्यं विशेषणीयत्वाद् ज्ञानपदं सप्रयोजनमिति ध्येयम् ।

अत्र केचित् पक्षकुक्षिप्रविष्टं प्रामाण्यपदं भावविहितल्युट्प्रत्ययनिष्पन्नत्वेनैव गृह्णन्ति । प्रकर्षद्योतकोपसर्गयोगात् माधातुः प्रकृष्टां मतिमुपस्थापयति । विशेष्यावृत्त्यप्रकारकत्वादिनानाप्रकर्षाणां मध्ये प्रकरणबलात् तद्वति तत्प्रकारकत्वरूपप्रकर्षयुक्तमतिरेवात्र प्रमाणपदार्थः । तदुत्तरतद्धितेन च तद्वति तत्प्रकारकत्वविशिष्टज्ञानत्वमुपस्थाप्यते । एवञ्च सति तादृशं ज्ञानत्वं प्रामाण्यपदेन विप्रतिपत्तौ धर्मित्वेन लब्धं भवति । व्युत्पत्तिलभ्यस्य तादृशार्थस्य ज्ञानातिरिक्तेऽवर्तमानत्वाद् ज्ञानपदं निष्प्रयोजनं भवतीति विचारयन्तो धर्मिप्रविष्टस्य विशेष्यीभूतज्ञानत्वांशस्य स्वतःप्रकाशत्वविचारेऽनुपयोगात् तद्वर्ज्यं तद्वति तत्प्रकारकत्वरूपं प्रामाण्यमेव विप्रतिपत्तौ धर्मि स्यात् । धर्मितावच्छेदकीभूततादृशप्रकारकत्वत्वेनानुगतस्य घटत्वादिमति घटत्वादिप्रकारकस्य कस्यापि इच्छायामपि सत्त्वाद् इच्छागततादृशप्रकारकत्वस्य च कस्मिन्नपि मते स्वतःप्रकाशत्वाभावाद् अंशतो बाधः स्यादिति तद्वारणाय ज्ञानपदमित्याहुः ।

एतदसमीचीनमिव प्रतिभाति । तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकेतिसाध्यकुक्षिप्रविष्टज्ञानस्यावश्यं पक्षीभूतप्रामाण्याश्रयत्वेन विवक्षणीयतया ज्ञानगततादृशप्रकारकत्वस्य अर्थतो लाभेन तदर्थं धर्मिणि पृथग्ज्ञानपदप्रवेशे प्रयोजनाभावात् । अन्ये तु प्रामाण्य-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मिति प्रामाण्यपदार्थं इत्यर्थः। तथा च प्रामाण्यपदार्थत्वेनैव धर्मित्वं बोध्यम्, न तद्वति तत्प्रकारकत्वत्वेन। प्रामाण्यपदार्थत्वञ्च प्रमाकरणत्वे विशेष्यावृत्त्यप्रकारत्वादौ च वर्तत इति तेषामपि धर्मिण्यन्तर्भावः स्यात्। तत्र च तदप्रामाण्याग्राहकेत्यादि- विधिकोटेरभावाद् अंशतो बाध इति तन्निवृत्त्यर्थं धर्मिकुक्षौ ज्ञानपदप्रयोगः। न च प्रमाकरणत्वस्य विशेष्यावृत्त्यप्रकारत्वस्य च प्रामाण्यपदप्रतिपाद्ययोर्व्याप्तिज्ञानादि-वृत्तितया च पक्षकुक्षिनिःक्षिप्तत्वात् तत्र च विधिकोटेरसत्त्वाद् ज्ञानपदप्रवेशेऽप्यशंतो बाधस्तदवस्थ एवेति वाच्यम्, ज्ञानपदस्यात्र प्रवृत्तिकारणीभूतज्ञानविषये लाक्षणिकत्वात्। प्रवृत्तिं प्रति च तद्वति तत्प्रकारकत्वरूपप्रामाण्यविषयकज्ञानस्यैव हेतुत्वाद् बहु-वित्तायाससाध्यस्थलीयप्रवृत्तिहेतुभूतज्ञानविषयीभूतं यत् प्रामाण्यपदप्रतिपादितं वस्तु, तस्यैव धर्मित्वान्नांशतः सिद्धसाधनमित्याचक्षिरे।

वस्तुतस्तु घटत्ववति घटत्वप्रकारकत्वं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहक-सामग्रीगाह्यं न वेत्याकारिकैव विशिष्य विप्रतिपत्तिर्बोध्या। ज्ञानप्रामाण्यमिति तु तादृशधर्मिणो लाभाय परिचायकमेव; न तु यत्तदादिघटितो ज्ञानवृत्तित्वादिविशेषितश्च धर्मी विप्रतिपत्तौ प्रवेशनीयः। तथा सति कस्या अपि तद्वति तत्प्रकारकत्वव्यक्तेः स्वाश्रय-ज्ञानग्राहकयावत्सामग्रीग्राह्यत्वाभावेन विधिकोटेरेवाप्रसिद्धेर्धर्मिणस्तत्पदघटितत्वे घट-त्ववति घटत्वप्रकारकत्वस्येव पटत्ववति पटत्वप्रकारकत्वस्यापि युगपदेव ग्रहणसम्भवेन तादृशस्वाश्रयग्राहकयावत्सामग्रीजन्यज्ञानस्य कुत्राप्यभावात्। एवञ्च ज्ञानत्वादि-पदार्थानां व्यावृत्तिप्रदर्शने प्रश्न एव नावतरति तेषां धर्मिण्यप्रविष्टत्वादिति मादृशाः। घटत्ववति घटत्वप्रकारकत्वमपि न तादृशप्रकारकत्वत्वेन ज्ञानेच्छादिसाधारणतया अनुगमय्य ग्रहणीयम्। तथा सति स्वाश्रयत्वेन इच्छाया अपि ग्रहणसम्भवात् तत्तज्ज्ञानग्राहकयावत्सामग्रीग्राह्यत्वस्यापि अप्रसिद्धत्वेन विधिकोट्यप्रसिद्धेस्ताद-वस्थ्यात्। एवञ्च समानाकारकज्ञानीयतादृशप्रकारकत्वानां ज्ञानभेदे, विभिन्नानां प्रत्येकमेव तत्तत्प्रकारकत्वं विप्रतिपत्तौ धर्मित्वेन ग्राह्यम्। न चैवमननुगम इति वाच्यम्, मतत्रयाणामनुगमेन विप्रतिपत्तिप्रदर्शनस्यैव ग्रन्थकृतामभिप्रेतत्वात्। धर्मिणामननुगमेऽपि मणिकाराभिप्रायस्य व्याघाताभावादिति सर्वं चतुरस्रम्।

यद्यपि घटत्ववति घटत्वप्रकारकत्वत्वेनानुगतानां समानाकारकविभिन्नेच्छा-ज्ञानीयानां घटत्ववति घटत्वप्रकारकत्वानां धर्मित्वेऽपि स्वाश्रयेच्छाज्ञानानां प्रत्येकं ग्राहिका यावत्यः सामग्र्यस्तज्जन्यस्य कस्यापि ज्ञानग्रहस्याप्रसिद्धत्वेऽपि तादृश-सामग्रीव्यापकत्वस्य स्वग्राहकत्वे निवेशेन घटत्ववति घटत्वप्रकारकत्वं स्वाश्रयज्ञान-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ग्राहकसामग्रीत्वव्यापकस्वग्राहकताकं न वेति विप्रतिपत्तिः सम्भवति। साध्यकोटा-वुभयत्र स्वपदं धर्मिपरं बोध्यम्। एवञ्च तादृशविभिन्नसामग्रीणां प्रत्येकं घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यग्राहकत्वस्य सत्त्वान् नाप्रसिद्धिनिबन्धनो दोषः।

तथाप्येतदसमीचीनमेव प्रतिभाति। तथा हि, तादृशप्रकारत्वाश्रयीभूतं यद् घटविषयकं ज्ञानं तद्विषयकग्रहजनकसामग्रीत्वेन यथा प्राभाकरमते तस्यैव व्यवसायात्मकघटज्ञानस्य उत्पादकसामग्र्या ग्रहणं भवति तथा अतीततज्ज्ञान-विषयकस्मरणशाब्दादिसामग्र्या अपि ग्रहणं स्यात् तादृशस्मरणशाब्दादि-सामग्र्यां घटत्ववति घटत्वप्रकारकत्वग्राहकत्वासत्त्वेन स्वग्राहकत्वस्य तादृश-सामग्रीत्वव्यापकत्वाभावाद् विधिकोटेरप्रसिद्धया सामग्र्यां यावत्त्वप्रवेशासम्भवः। ये तावत् प्राभाकरादयो ज्ञानप्रामाण्यस्य स्वतःप्रकाशत्वमङ्गीकुर्वन्ति तेषां मतेष्वपि न सर्वत्र ज्ञानविषयकज्ञानेषु तत्रविषयीभूतज्ञानानां प्रामाण्यं प्रकाशते। प्राभाकरमते उत्पन्नं ज्ञानं स्वयं स्वमिव स्वगतप्रामाण्यमपि प्रकाशयति इति सिद्धान्तितम्। तन्मतेऽपि स्वयंप्रकाशात्मकानां ज्ञानानां कालान्तरे स्मरणमनुमानं वा न स्वीकृतमस्ति। स्मरणा-द्यात्मकेषु ज्ञानग्रहणेषु तद्विषयीभूतं ज्ञानाप्रामाण्यं ज्ञानोत्पत्तिकाले प्रकाशितमपि स्मरणादिकाले अप्रकाशितं स्थातुमर्हति। तथा च तत्र तत्र ज्ञानग्राहकसामग्रीषु प्रामाण्यग्राहकत्वस्यासत्त्वान् न तस्य तादृशसामग्रीत्वव्यापकत्वम्। एवं मिश्रादि-मतेष्वपीति स्वयमूहनीयम्।

एके तु मिश्रादिमते अगृहीतप्रामाण्यकज्ञानीयप्रमात्वविशेषे बाधवारणाय धर्मिणि ज्ञानपदमित्याहुः। तच्च ज्ञातरूपार्थे लाक्षणिकम्। एवञ्च ज्ञातस्यैव प्रमात्व-विशेषस्य पक्षत्वान् न तद्दोष इति। तदप्यपेशलम्। मिश्रादिमते अप्रमात्वग्राहकासमव-धानदशायामनुव्यवसायादिना ज्ञानप्रकाशकाले प्रमात्वप्रकाशस्यावश्यं स्वीकारेण तादृशं प्रमात्वमेवाप्रसिद्धं यस्य अप्रमात्वाग्राहकतज्ज्ञानग्राहकसामग्रीदशायां प्रकाशो न भवति। तज्ज्ञानस्याप्रकाशे तु तत्प्रमात्वात्मकधर्मिण एवाप्रसिद्धत्वेन तत्र बाधावतारप्रश्नस्यै-वानवकाशादिति परमार्थः। न च भाविज्ञानं निष्प्रकारकमित्येवं बाधनिश्चयसत्त्वे अप्रमात्वग्राहकस्यासमवधानदशायामनुव्यवसायादिना ज्ञानस्य प्रकाशेऽपि प्रमात्वं प्रकारकत्वघटिततया अप्रकाशितमेव स्यादिति तादृशज्ञानग्रहणस्थले मिश्रादिमते बाधः स्यादेवेति वाच्यम्—अनुभवविरोधात्। तथा हि तादृशबाधदशायां ज्ञानानामनुव्यव-सायस्वीकारे सप्रकारकत्वप्रकाशवर्ज्यो धर्मिमात्रप्रकाशात्मक एव स्यात्। ज्ञानस्य ताद्रूप्येण प्रकाशेऽनुभवविरोधस्य सर्वजनस्वीकृतत्वादित्यलमतिपल्लवितेन।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

साध्यकोटौ तदप्रामाण्यग्राहकयावज्ज्ञानग्राहकेति यावत्पदस्य प्रयोगो दृश्यते। तदुपस्थापितयावत्त्वञ्च ज्ञानग्राहकेतिप्रथमज्ञानपदार्थे ग्राहकेतिग्रहधात्वर्थे ग्राहकसामग्र्यां ग्राह्येति चरमग्रहधात्वर्थे वा विशेषणं भवितुमर्हति। प्रथमज्ञाने यावत्त्वनिवेशे तु तदप्रामाण्यग्राहकानि यावन्ति ज्ञानानि तद्ग्राहकसामग्रीग्राह्यत्वं विधिकोटिः स्यात्। एवञ्च सा अप्रसिद्धा भवति, कस्या अपि ज्ञानग्राहकसामग्र्याः यावज्ज्ञानग्राहकत्वाभावात्। अतस्तद्घटितं तादृशग्राह्यत्वमपि सुतरामप्रसिद्धं भवति। ग्राहकेति ग्रहधात्वर्थे यावत्त्वस्य प्रवेशे तु तदप्रामाण्यग्राहका यावन्तो ज्ञानग्रहास्तज्जनकसामग्रीग्राह्यत्वमेव विधिकोटिः। एवमपि तत्कोटिरप्रसिद्धैव भवति। कस्या अपि सामग्र्यास्तादृशयावद्ग्रहजनकत्वासम्भवात्। सामग्र्यां तस्य विशेषणत्वे तु तदप्रामाण्यग्राहिका ज्ञानग्राहिका यावत्यः सामग्र्यस्तद्ग्राह्यत्वं विधिकोटिर्भवति। एवमपि अप्रसिद्धसाध्यतैव दोषः स्यात्। ज्ञानग्राहिकाभिर्ज्ञानप्रत्यक्षानुमानशाब्दबोधसमग्रीभिः यावतीभिः कस्यापि ग्रहस्याजननात् तादृशसामग्रीग्राह्यत्वमप्रसिद्धमेव। अतः ग्राह्यत्वमिति चरमग्रहधात्वर्थे एव यावत्त्वस्य अन्वय एष्टव्यः। एवञ्च तदप्रामाण्यग्राहकज्ञानग्राहकसामग्रीजन्या यावन्तो ग्रहास्तत्प्रत्येकग्राह्यत्वं तादृशग्रहत्वव्यापकविषयताकत्वं विधिकोटेः परिनिष्ठितं रूपं स्यात्। प्राभाकरमते यावद्ग्रहत्वेन स एव व्यवसायात्मको ग्रहः, मिश्रमते अनुव्यवसायात्मको ग्रहः, कुमारिलमते ज्ञाततालिङ्गकानुमित्यात्मको ग्रहो ग्रहणीयः। तद्विषयत्वस्य तादृशग्रहत्वव्यापकविषयताकत्वस्य वा पक्षीभूतघटत्ववति घटत्वप्रकारकत्वे सत्त्वाद् विधिकोटिप्रसिद्धिः सुगमा। न्यायमते पक्षे तादृशयावद्ग्रहविषयत्वस्य तादृशग्रहत्वव्यापकविषयताकत्वस्य वा असत्त्वात् निषेधकोटिरपि सरलैवेति बोध्यम्।

ननु सामग्र्यां यावत्त्वनिवेशपक्षे यावत्सामग्रीजन्यस्य कस्यापि ग्रहस्याप्रसिद्ध्या या साध्याप्रसिद्धिः पूर्वं प्रदर्शिता अत्रापि पक्षे सास्त्येव। सामग्रीपदस्य यावत्कारणपरत्वात्। तथा हि घटत्ववति घटत्वप्रकारकत्वं स्वाश्रयग्राहकयावत्कारणजन्यग्रहविषय इत्येवमत्र विधिकोटिः स्यात्। अनुव्यवसायानुमितिशाब्दात्मकज्ञानग्रहाणां यावन्ति कारणानि तज्जन्यस्य कस्यापि ग्रहस्यासम्भावादिति चेन्न। सामग्रीपदस्य तत्तत्कार्यव्यक्तिनिरूपितकारणसमुदायपरत्वात्। एवञ्च कस्यापि ज्ञानविषयकज्ञानात्मककार्यस्य उत्पत्त्यर्थमपेक्षितानि यावन्ति कारणानि तज्जन्यग्रहत्वेन तादृशयावत्कारणसापेक्षपूर्वोक्तज्ञानविषयकग्रहविशेषस्य ग्रहणसम्भवेन तद्विषयत्वस्य प्राभाकरादिमते तत्तत्प्रामाण्यात्मकधर्मिणि सत्त्वाद् विधिकोटिप्रसिद्धिः।

न च प्राभाकरादिमते ज्ञानस्य स्वप्रकाशत्वानुव्यवसायगम्यत्वज्ञाततालिङ्गकानुमितिप्रकाश्यत्वस्वीकारेऽपि तत्तन्मते अतीतादिज्ञानानां स्मरणमनुमानं शाब्दं वा ज्ञानं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नानभ्युपगतमस्ति। स्मरणाद्यात्मकेषु ज्ञानविषयकज्ञानेषु विषयीभूतज्ञानानां प्रामाण्यं न प्रकाशत इत्यपि तेषामभिमतम्। एवञ्च स्वाश्रयज्ञानग्राहकसामग्री-जन्ययावद्ग्रहविषयत्वस्य पक्षीभूतप्रामाण्ये असत्त्वाद् विधिकोटेर्बाध इति वाच्यम्। अतीतादिज्ञानानामुत्पत्तिसमये तदव्यवहितानन्तरमनुव्यवसाये परवर्तिज्ञाततालिङ्गकानु-माने वा यदा तेषां ग्रहणमासीत् तदा तद्ग्रहे तदीयप्रामाण्यस्याप्यवश्यं प्राभा-करादिमते प्रकाशितत्वाद् अतीतादीनां तेषां स्मरणादावपि प्रामाण्यसहितानामेव तेषां तत्र क्रोडीभूतत्वात् तादृशयावद्ग्रहविषयत्वस्य सत्त्वेन विधिकोटेरबाधात्। तादृश-स्थलेऽनुमानादौ साध्यप्रसिद्धेरपि स्मरणैकशरणाद् अनुमित्यात्मकज्ञानग्रहेऽपि अन्ततो गत्वा ज्ञानलक्षणाया प्रामाण्यप्रकाशसम्भवात्। यावत्त्वस्य चरमग्रहविशेषणत्वपक्षेऽपि धर्मिणि प्रतिस्वम् एवं प्रामाण्यं प्रवेशनीयम्। तदप्रामाण्याग्राहकज्ञानेत्यत्रापि तादृश-प्रामाण्यव्यक्त्याश्रयीभूतमेव ज्ञानं साध्यकुक्षौ प्रवेश्यम्। अन्यथा पक्षकुक्षिनिक्षिप्तानाम-नन्तप्रामाण्यानां कुत्रापि विभिन्नविषयकविभिन्नज्ञानग्राहकसामग्रीजन्ययावद्ग्रहविषय-त्वस्यासत्त्वाद् विधिकोटेर्बाधः पूर्ववदेव स्यादिति सर्वमवदातम्।

इदानीमवसरतः प्रतिज्ञातस्य तदप्रामाण्याग्राहकेत्यंशस्य व्यावृत्तिर्विचार्यते। एतदपि ज्ञानग्राहकेतिग्रहधात्वर्थे सामग्र्यां ग्राह्येति ग्रहधात्वर्थे वा विशेषणं भवितु-मर्हति। सामग्र्यतिरिक्तेषु विशेषणत्वेन तदप्रामाण्याग्राहकत्वं तदप्रामाण्याविषयकत्व-रूपं बोध्यम्। सामग्रीविशेषणत्वे तु तदप्रामाण्यग्रहाजनकत्वरूपो यथाश्रुत एवार्थो ग्राह्यः। तत्र प्रथमपक्षमवलम्ब्य चिन्त्यते। अप्रामाण्याग्राहकेत्यंशस्य सर्वथा परिहारे तु ज्ञानप्रामाण्यं यावज्ज्ञानग्राहकसामग्रीग्राह्यं न वेति विप्रतिपत्तिः पर्यवसिता भवति। एवञ्च सति धर्मिणि विधिकोटिर्बाधिता भवेत्। तथा हि प्रामाण्याश्रयीभूतज्ञानस्यापि अप्रामाण्यभ्रमदशायामप्रमात्वेनैव ग्रहणात् तादृशज्ञानग्राहकसामग्रीजन्यग्रहस्यापि अप्र-मात्वविषयकत्वात् यावज्ज्ञानग्राहकसामग्रीजन्यग्रहविषयत्वस्य पक्षीभूतज्ञानप्रामाण्येऽ-सत्त्वाद् बाधः स्पष्ट एव। प्राभाकरमते तादृशबाधज्ञानदशायामुत्पन्नस्य ज्ञानस्य अप्रामाण्यविषयकस्य ग्राहको यस्तदीयोत्पादककारणसमूहस्तज्जन्यस्य स्वात्मक-व्यवसायस्य प्रमात्वाप्रकाशकत्वात् तन्मते विधिकोटेर्बाधः। मिश्रमतेऽपि तादृशस्थले ज्ञानानुव्यवसायस्यावश्यमप्रमात्वविषयकत्वात् तज्जनकसामग्रीजन्यचरमग्रहस्यापि अनु-व्यवसायस्याप्रमात्वविषयकत्वावश्यम्भावात् तन्मतेऽपि विधिकोटेर्बाधः स्यादेव। भाट्ट-मतेऽपि तादृशस्थले ज्ञाततालिङ्गकानुमानकाले ज्ञानानुमितेः अप्रमात्वविषयकत्वाद् ज्ञानग्राहकसामग्रीजन्यानुमित्यात्मकग्रहविषयत्वस्य पक्षीभूतज्ञानप्रामाण्येऽसत्त्वाद् बाधो बोध्यः। सामग्रीविशेषणत्वपक्षे चरमग्रहधात्वर्थविशेषणत्वपक्षेऽपि व्यावृत्तिः पूर्ववदेव बोध्या। ग्राहकेति ग्रहधात्वर्थे अप्रामाण्याविषयकत्वरूपस्य प्रामाण्याग्राहकत्वस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विवक्षणे तु तादृशबाधभ्रमोत्तरकालजायमानस्य प्रामाण्याश्रयीभूतज्ञानग्रहस्याप्रमात्वविषयकत्वनियमाद् अप्रमात्वविषयकज्ञानग्रहत्वेन ग्रहणासम्भवान्न तादृशज्ञानग्रहमादाय बाधो भवितुमर्हति। एवं चरमग्रहधात्वर्थविशेषणत्वपक्षेऽपि अप्रमात्वविषयकग्रहस्य प्रामाण्याग्राहकज्ञानग्राहकसामग्रीजन्यग्रहत्वेन ग्रहणासम्भवात् तत्पक्षेऽपि न बाध इति मर्मार्थः।

यद्यपि ज्ञानग्रहणात् पूर्वं धर्मिणोऽप्रसिद्धत्वात् न तत्र अप्रमात्वस्य ग्रहणं भवितुमर्हति। प्राभाकरमते उत्पत्तिकाल एव ज्ञानस्य स्वगतप्रमात्वेन प्रकाशस्वीकाराद् अनन्तरकालेऽपि तेन बाधादेव न तत्राप्रमात्वस्य ज्ञानं सम्भवति, एवं मिश्रादिमतेष्वपि अनुव्यवसायादिना ज्ञानप्रकाशकाले एव तद्गतप्रमात्वस्याप्यवश्यं निर्णयात् पूर्वकाले इव नोत्तरकालेऽपि तत्राप्रमात्वग्रहणं भवितुमर्हतीति कथम् अप्रामाण्याग्राहकेत्यंशस्य पूर्वोक्ता व्यावृत्तिः संगच्छते। तथापि भाविज्ञानमप्रमेत्याकारेण स्वोत्पत्तेः पूर्वकाले प्रमाज्ञानात्मकधर्मिणि ज्ञानत्वेन सामान्येन जायमाने अप्रमात्वभ्रमोत्पत्तौ बाधाभावात्। भाविज्ञानमप्रमा इत्येवमाकारेण पूर्वकालीनज्ञानस्य नव्यनैयायिकैर्बहुत्र स्वीकारात्। वस्तुतस्तु अप्रामाण्याग्राहकेति मूलस्य अप्रामाण्यज्ञानजनककारणासमवहितत्वार्थकत्वे व्यावृत्तिः सुलभा। तादृशसमवधानदशायां ज्ञानग्रहणेऽपि प्रामाण्यग्रहणासम्भवाद् विधिकोटेर्बाधो न दुर्लभ इति तत्तन्मतानुसारेण तदंशस्य व्यावृत्तिः स्वयमूहनीया।

तदप्रामाण्याग्राहकेति तत्पदाप्रक्षेपे अप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यत्वमित्येव पर्यवसिता विधिकोटिः। एवञ्च सति घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यग्रहणकाले घटत्वाभाववति घटत्वप्रकारकत्वरूपाप्रामाण्यघटकस्य तादृशप्रामाण्यग्रहप्रतिबन्धकज्ञानविषयस्य घटत्वादेर्ग्राहकसामग्र्या अवश्यं समावेशाद् अप्रामाण्याग्राहकतादृशप्रामाण्याश्रयीभूतज्ञानग्राहकसामग्र्या अप्रसिद्धिः स्यादिति तद्वारणार्थम् अप्रामाण्यकुक्षौ तत्पदमावश्यकम्। तथा च तस्मिन् अप्रामाण्यमिति सप्तमीसमासनिष्पन्नत्वेन तदप्रामाण्यपदस्य तत्तज्ज्ञानगतं यदप्रामाण्यं तदग्राहकत्वस्यैव विशेषणत्वलाभात् तादृशप्रामाण्यग्रहप्रतिबन्धकीभूतज्ञानविषयस्यापि घटत्वादेर्ज्ञानवृत्तित्वाभावात् तदप्रामाण्यपदेन घटत्वादिकं व्यावृत्तमेव स्यात्। एवञ्च न घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यग्राहकसामग्र्या अप्रामाण्याग्राहिकायाः प्रकृतेऽप्रसिद्धिः।

न च तत्पदाप्रवेशेऽपि अप्रामाण्याग्राहकान्तर्गतस्य अप्रामाण्यस्य साक्षात् प्रमात्वग्रहप्रतिबन्धकीभूतज्ञानविषयत्वार्थकत्वे न घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यग्रहणकाले घटत्वविषयकज्ञानसामग्र्या अवश्यं समावेशादपि विधिकोट्य-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रसिद्धिः। प्रदर्शितविप्रतिपत्तौ घटत्ववति घटत्वप्रकारकत्वरूपप्रमात्वस्य धर्मित्वात् तादृशप्रमात्वग्राहकसामग्र्यं व ज्ञानग्राहकसामग्रीत्वेन गृहीता स्यात्। तादृशस्थलेऽप्रमात्व-ग्रहस्य भ्रमत्वरूपत्वावश्यम्भावादलौकिकसन्निकर्षजन्यत्वं तस्यावश्यं स्वीकार्यम्। प्रकृतप्रमात्वस्य च लौकिकसन्निकर्षेणैव ग्रहणात् तादृशलौकिकप्रत्यक्षे च भ्रमज्ञानस्य प्रतिबन्धकत्वाभावात् न अप्रमात्वघटकीभूतघटत्वादेस्तादृशप्रमात्वग्रहप्रतिबन्धकज्ञान-विषयत्वेन ग्रहणं भवितुमर्हति। तथा च तत्पदाप्रवेशेऽपि न अप्रमाण्याग्राहकतत्त-त्प्रमात्वाश्रयीभूतज्ञानग्राहकसामग्र्यप्रसिद्धिनिबन्धनो दोष इति तत्पदमनतिप्रयोजनक-मिति वाच्यम्। इदं ज्ञानं निष्प्रकारकमित्यादिज्ञानीयनिष्प्रकारत्ववति निष्प्रकार-कत्वरूपप्रमात्वस्य धर्मितास्थले विधिकोटेरवश्यमप्रसिद्धेः।

तदप्रामाण्याग्राहकेति। तदप्रामाण्याग्राहकत्वस्य सामग्रीविशेषणत्वपक्षे व्यावृत्तिः प्रदर्श्यते अस्यानुल्लेखे ज्ञानप्रामाण्यं यावज्ज्ञानग्राहकसामग्रीग्राह्यं न वेति विप्रति-पत्तेराकारो जायते। अत्र प्रामाण्याश्रयीभूतज्ञानानां ग्राहिका यावत्यः सामग्र्यस्तत्प्रत्येक-जन्यग्रहविषयत्वं विधिकोटिः स्यात्। एवञ्च मिश्रादिमते विधिकोटेर्बाधो नैयायिकादिमते च निषेधकोटेः सिद्धसाधनता दोषो भवति। पक्षीभूतप्रामाण्याश्रयी-भूतज्ञानस्य यथा इदं ज्ञानं घटत्ववति घटत्वप्रकारकमित्याकारेणानुव्यवसायो भवेत् तथा व्यवसायोत्पत्तिकालीनदोषादिसमवधानात् इदं ज्ञानं घटत्ववति घटत्वप्रकारत्वा-भाववदित्याकारेणापि अनुव्यवसायादिना ग्रहणं भवितुमर्हति। ज्ञानग्राहकया-वत्सामग्र्यन्तर्गततादृशदुष्टसामग्रीजन्यपूर्वोक्ताकारकग्रहविषयत्वस्य पक्षीभूतप्रमात्वेऽ-सत्त्वाद् विधिकोटेर्बाधो बोध्यः। एतन्निरासार्थमेव सामग्र्यां तदप्रामाण्याग्राहकत्वं निवेशितम्। एवञ्च दोषघटितसामग्र्या अप्रामाण्याग्राहकत्वान्न तादृशसामग्र्या ज्ञानग्राहकयावत्सामग्र्यामन्तर्भावः। तथा च बाधनिरासः। यत्तूच्यते प्रतियोगिवि-नाकृतस्य अभावबोधस्यासम्भवेन इदं ज्ञानं घटत्ववति घटत्वप्रकारकत्वाभाववदित्या-कारकज्ञानग्रहेऽपि अभावविशेषणतया घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यस्य भावात् बाधप्रसक्तिरेव नास्ति अतस्तद्वारकं तदप्रामाण्याग्राहकेति विशेषणं व्यर्थमेवति; तदा इदं ज्ञानं भ्रम इत्याकारकज्ञानग्रहणे प्रामाण्यस्याग्रहणात् प्रसक्तस्य बाधस्य वारणाय तद्विशेषणमावश्यकमेव।

न च इदं ज्ञानं भ्रम इत्याकारकज्ञानग्रहस्यापि ज्ञानग्राहकयावत्सामग्रीजन्य-ग्रहान्तर्गतत्वेन तादृशज्ञानग्रहे च प्रामाण्यविरोधिनो भ्रमत्वस्य ग्रहणात् तद्ग्राह्यत्वस्य पक्षीभूतप्रामाण्येऽभावाद् विधिकोटेर्बाध इति वाच्यम्। तदभाववति तत्प्रकारक-ज्ञानत्वरूपभ्रमत्वस्य तद्वति तत्प्रकारकज्ञानत्वरूपप्रामाण्याभावात्मकत्वात् ग्राह्या-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

भावनिश्चयस्य प्रतिबन्धकत्वे तादृशभ्रमत्वज्ञानस्य प्रमात्वग्रहं प्रत्यप्रतिबन्धकत्वात् भ्रमत्वग्रहणकालेऽपि प्रमात्वग्रहणे बाधकाभावेन तादृशभ्रमत्वग्रहेऽपि प्रमात्वग्रहस्य कल्पनासम्भवात्। यद्युच्यते ग्राह्याभावानात्मकत्वेऽपि वह्निजलयोरिव प्रमात्वभ्रमत्वयोर्नियतासामानाधिकरण्यरूपविरोधसत्त्वात् कथं भ्रमत्वग्रहणकाले तत्रैव ज्ञाने प्रमात्वग्रहसम्भव इति। तदापि विरोधदर्शनकाल एव अवच्छेदकधर्मदर्शनविधया जलज्ञानस्येव वह्निज्ञाने भ्रमत्वग्रहस्य प्रमात्वग्रहे प्रतिबन्धकत्वं कल्पनीयं स्यात्। तादृशविरोधज्ञानासमवधानदशायां भ्रमत्वज्ञानेऽपि प्रमात्वनिर्णये बाधकाभावात् तादृशयावत्सामग्रीजन्यग्रहविषयत्वस्य प्रमात्वे सत्त्वात् तदप्रामाण्याग्राहकेति सामग्रीविशेषणमनर्थकमिति चेन्न। भ्रमत्वे प्रमात्वविरोधज्ञानदशायामुत्पन्नस्य इदं भ्रम इत्याकारकज्ञानग्रहस्य प्रमात्वाग्राहकत्वात् विधिकोटेर्बाधो दुर्निवार एवेति तन्निरासार्थं ज्ञानग्राहकसामग्र्यां तदप्रामाण्याग्राहकत्वस्य अवश्यं निवेशनीयत्वादिति ध्येयम्।

यद्वा इदं ज्ञानं निष्प्रकारकमित्याकारकभ्रान्तज्ञानग्रहे प्रामाण्यस्याग्रहाद् विधिकोटेर्बाध इति तन्निरासार्थमप्रामाण्याग्राहकत्वं सामग्रीविशेषणमावश्यकम्। अस्मिन् पक्षे प्रामाण्यग्रहप्रतिबन्धकीभूतज्ञानसामग्र्या एवाप्रामाण्यग्राहकत्वम् बोध्यम्; तादृशसामग्र्यसमवधानमेव अप्रामाण्याग्राहकेत्यनेन ज्ञानग्राहकसामग्र्यां विशेषणत्वेन प्रविष्टम्। अनुव्यवसायस्याभ्रान्तत्वपक्षे तु अप्रामाण्याग्राहकेत्यंशस्य व्यावृत्तिप्रदर्शनार्थं प्रदर्शिता ज्ञानग्रहा इदं ज्ञानं घटत्ववति घटत्वप्रकारकत्वाभाववदित्याद्याकारिकाः सर्वा एव अनुमित्यादिरूपा ग्राह्याः ज्ञानग्राहकेत्यत्र ज्ञानपदस्य पक्षीभूतप्रामाण्याश्रयत्वेन वस्तुतः प्रमात्मकस्य पूर्वोक्तप्रकारेण भ्रान्तानुव्यवसायासम्भवात्। तादृशज्ञानविषयकानुमानादिस्थले च मूलीभूतज्ञानस्य पक्षीभूतप्रमात्वाश्रयीभूतस्य अतीतत्वादनुमानादिस्थले विषयविधया अनुव्यवसायकारणीभूतस्य व्यवसायात्मकज्ञानस्य असत्त्वात् तदानीमनुव्यवसायसामग्रीविरहेण तया प्रतिबन्धात् तादृशज्ञानविषयकानुमित्यात्मकज्ञानस्योत्पत्त्यसम्भव इति तात्पर्यम्।

पूर्वमेतदुक्तं यद् अप्रामाण्याग्राहकमितिसामग्र्यां ज्ञानग्रहे चरमग्रहे वा विशेषणं भवितुमर्हति, तत्र प्रदर्शितं विशेषणं प्राभाकरमतेऽप्रसिद्धमिति कथं तद्विशेषणयुक्ता विधिकोटिः मतत्रयसाधारणी स्यात्, प्राभाकरमते भ्रमात्मकज्ञानस्य सर्वथा अस्वीकारात् तद्ग्राहकत्वमपि तन्मतेऽलीकमेव। अतः उक्तपदस्य तादृशं व्याख्यानमावश्यक येन प्राभाकरमतेऽपि अप्रामाण्याग्राहकत्वं प्रसिद्धं भवेत्। अतोऽप्रामात्वग्राहकत्वाभावरूपस्याप्रमात्वाविषयकत्वस्य वा आपाततो लब्धस्यार्थस्य न विधिकोटौ प्रवेशस्तादृशार्थस्य प्राभाकरैरनंगीकारात् तत्पदव्याख्यायां दीधितिकारेणोक्तं यत् तज्ज्ञानगतप्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च यद् भट्टमतसम्मतं तद्भिन्नत्वमत्र अप्रामाण्या-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ग्राहकत्वं बोध्यम्। एवञ्च नेदानीं तदप्रसिद्धिरूपो दोषः। भट्टमतानुसारेण प्रामाण्याग्राहकं सत् ज्ञानग्राहकं तदेव भवेत् यदिच्छादिलिङ्गकं ज्ञानानुमानम्। तादृशानुमानस्य भट्टमते प्रामाण्यग्राहकत्वमस्वीकृतम्। साधारणतस्तन्मते ज्ञाततालिङ्गकानुमानस्यैव प्रमात्वग्राहकत्वात्। समर्थप्रवृत्तिजनकत्वलिङ्गकज्ञानानुमानस्य प्रामाण्यग्राहकत्वं सर्वेषां सम्प्रतिपन्नमस्ति। तथा च भट्टमतसिद्धज्ञाततालिङ्गकानुमानस्य प्रामाण्यग्राहकत्वे नियमात् तादृशमनुमानं प्रामाण्याग्राहकाद् भिन्नमवश्यं स्यात्। तदेव च भट्टमतानुसारेण प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च यद् भट्टमतसिद्धं तद्भिन्नत्वेन ग्राह्यं स्यात्। तदप्रामाण्याग्राहकज्ञानग्राहकतादृशानुमितिजनकसामग्रीजन्यज्ञानाविषयत्वस्य प्रमात्वे सत्त्वाद् भट्टमते विधिकोटिप्रसिद्धिर्बोध्या। प्रभाकरमते सिद्धा या ज्ञानोत्पादिका ज्ञानग्राहिका सामग्री तस्या भट्टेन ज्ञानग्राहकतया अनभ्युपगमाज् ज्ञानोत्पादिकापि सामग्री प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च यद् भट्टमतसिद्धं तदन्यत्वेन गृहीता स्यात्, एवञ्च ज्ञानोत्पादकसामग्र्यास्तदप्रामाण्याग्राहकसामग्रीत्वेन ग्रहणात् तादृशसामग्रीजन्यग्रहविषयत्वस्य प्रमात्वे सत्त्वात् प्राभाकरमतानुसारेण विधिकोटिप्रसिद्धिः। मिश्रमतसम्मता या अनुव्यवसायसामग्री तस्या भट्टमतानुसारेण ज्ञानाग्राहकत्वात् सापि प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च यद् भट्टमतसिद्धं तदन्यत्वेन गृहीता स्यात्। एवञ्च तदप्रामाण्याग्राहकज्ञानग्राहकसामग्रीत्वेन च तस्याः ग्रहणात् तादृशसामग्रीजन्यज्ञानविषयत्वस्य प्रामाण्ये सत्त्वात्, मिश्रमतानुसारेणापि विधिकोटिः सुलभैवेति सर्वमवदातम्।

पूर्वत्र तदप्रामाण्याग्राहकेत्यंशस्य यथा नाप्रसिद्धिर्भवति तथा व्याख्यानप्रसंगे तज्ज्ञानप्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन यद्भट्टमतसिद्धं तद्भिन्नत्वस्य अप्रामाण्याग्राहकत्वमुक्तम्। विशेषणांशे तज्ज्ञानप्रामाण्याग्राहकत्वेनेत्यत्र तत्पदाप्रवेशे घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यस्य धर्मित्वे तत्र विधिकोटिर्बाधिता भवतीति तन्निरासार्थं कथितविशेषणांशे पक्षीभूतप्रामाण्यव्यक्तेः प्रवेश आवश्यक इति तदर्थं तत्र तत्पदं प्रदत्तम्। तथा हि यदि शब्दादिना पटज्ञानं प्रमा अयञ्च घट इत्याद्याकारकं समूहालम्बनं ज्ञानं स्वीक्रियते तदा तत्र ज्ञाने पटत्ववति पटत्वप्रकारकत्वरूपप्रामाण्यस्य प्रकाशात् तादृशशाब्दज्ञानसामग्र्यां सामान्यतः प्रामाण्याग्राहकत्वस्य असत्त्वेन ज्ञानग्राहकत्वस्य च सत्त्वेन प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च यद् भट्टमतसिद्धं तदन्यत्वेन सापि सामग्री तादृशयावत्सामग्र्यन्तर्गता भवति, तज्जन्यज्ञानविषयत्वस्य घटत्ववति घटत्वप्रकारकत्वरूपपक्षीभूतप्रामाण्येऽसत्त्वाद् विधिकोटेर्बाधो बोध्यः। तत्पदप्रवेशे तु विधिकोटावपि घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यव्यक्तेरेव प्रवेशात् प्रदर्शितज्ञानस्य च तादृशप्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च भट्टमतसम्मतत्वात् तद्भिन्नत्वरूप-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मप्रमाण्याग्राहकत्वं तादृशसामग्र्यां नास्तीति न तादृशसामग्रीजन्यग्रहविषयत्वस्य पक्षीभूतप्रामाण्येऽसत्त्वेऽपि बाधः। प्रामाण्यग्राहकत्वमित्यत्र ग्राहकत्वं प्रामाण्यग्रहरूपफलेन विशिष्टत्वरूपं बोध्यं न तु प्रामाण्यग्रहस्वरूपयोग्यत्वरूपम्। एवं ज्ञानग्राहकमित्यत्रापि फलोपधानरूपमेव तद् ग्राह्यम्। तथा च तत्प्रामाण्यग्रहानुपहितत्वेन ज्ञानग्रहोपहितत्वेन च यद्भट्टमतसिद्धं तद्भिन्नत्वमप्रामाण्याग्राहकत्वमिति पर्यवसितोऽर्थः। प्रथमोपधाय कत्वस्थले स्वरूपयोग्यत्वमात्रविवक्षणे इदं ज्ञानं घटविषयकमित्याद्याकारकशाब्दादिज्ञानग्राहकसामग्रीमादाय विधिकोटेर्बाधः स्यात्। तथा हि प्रदर्शितज्ञानविषयकशब्दज्ञानजनकसामग्र्याः प्रामाण्यग्रहस्वरूपयोग्यतया प्रामाण्याग्राहकत्वस्य तत्र असत्त्वेन सापि सामग्री प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च भट्टमतसिद्धादन्यत्वेन गृहीता स्यात्। तादृशसामग्रीजन्यस्य इदं ज्ञानं घटविषयकमित्यादिशाब्दज्ञानस्य विषयतायाः प्रामाण्येऽसत्त्वेन विधिकोटिर्बाधिता भवति। फलोपधानरूपप्रामाण्यग्राहकत्वस्य विवक्षणे पुनस्तादृशप्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च तत्सामग्र्या भट्टमतसम्मतत्वात् तद्भिन्नत्वं तत्र नास्तीति न तामादाय विधिकोटेर्बाधावसरः। एवं ज्ञानग्राहकत्वेनेत्यत्र स्वरूपयोग्यत्वरूपस्य ग्राहकत्वस्य निवेशे प्राभाकरमतसिद्धा ज्ञानग्राहकसामग्री तदप्रामाण्याग्राहकत्वेन गृहीता न स्यात्। एवञ्च सति विधिकोटेर्मतत्रयसाधारण्यं न भवति। तथा हि भट्टमते ज्ञानस्यातीन्द्रियतया ज्ञानविषयो घट इत्याद्याकारकं प्रत्यक्षज्ञानं ज्ञानांशे उपनीतभानात्मकमवश्यं स्यात्। तादृशज्ञानस्य सर्वानुभवसिद्धत्वेन भाट्टैरनङ्गीकारासम्भवात्। प्रदर्शितौपनायिकभाने घटात्मकधर्मिभासकसामग्र्या अपि अवश्यमपेक्षितत्वेन अयं घट इत्याकारकघटविषयकप्रत्यक्षसामग्र्या अपि तादृशौपनायिकभाने स्वरूपयोग्यत्वमस्ति। एवञ्च अयं घट इति प्रत्यक्षोत्पादकसामग्र्याः प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च भट्टमतसिद्धतया तत्र कदापि प्रदर्शितमप्रामाण्याग्राहकत्वं न स्यात्। तथा च प्राभाकरमतसिद्धप्रामाण्यग्राहकसामग्र्यस्तदप्रामाण्याग्राहकज्ञानग्राहकसामग्रीत्वेन ग्रहणासम्भवादुक्तविधिकोटेर्मतत्रयसाधारण्यं न भवतीति ज्ञानग्राहकत्वेन च भट्टमतसिद्धमित्यत्रापि ज्ञानग्राहकत्वं ज्ञानग्रहणरूपफलेन विशिष्टत्वरूपं बोध्यम्। फलोपधानविवक्षणे च प्राभाकरमतसिद्धा सामग्री अपि विधिकोट्यन्तर्गता भवति। अयं घट इत्याकारकप्रत्यक्षोत्पादकसामग्र्या ज्ञानविषयकज्ञानरूपफलेन अनुपहितत्वात् तदप्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च यद् भट्टमतसिद्धं तदन्यत्वस्य तत्र सत्त्वादिति तात्पर्यम्।

नन्वेवं ज्ञानग्राहकत्वेन यद् भट्टमतसिद्धमित्यत्र ज्ञानविषयकत्वघटितधर्मावच्छिन्नजन्यतानिरूपितस्वरूपयोग्यतावत्त्वेन यद् भट्टमतसिद्धमिति विवक्षणेऽपि प्राभाकरमत-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सिद्धा ज्ञानोत्पादकसामग्री तदप्रामाण्याग्राहकज्ञानग्राहकसामग्रीत्वेन ग्रहीतुं शक्या भवति। अयं घट इत्याकारकप्रत्यक्षज्ञानोत्पादकसामग्रयन्तर्गतात्ममनोयोगादेर्ज्ञान-सामान्यकारणस्य ज्ञानविषयकत्वघटितधर्मावच्छिन्नजन्यतानिरूपितस्वरूपयोग्यतावत्त्वेन भट्टैरनङ्गीकारात् तदघटितकारणकूटात्मिकायाः प्रत्यक्षज्ञानोत्पादकसामग्र्या अपि सुतरां तादृशजन्यतानिरूपितस्वरूपप्रमात्वं न निश्चितं भवितुमर्हति। ज्ञानगतधर्माणां द्वाभ्यामेवोपायाभ्यां निर्णयो जायते स्वतः परतो वा, ज्ञानत्वादौ तथा दर्शनात्। तयोरुपाययोस्तत्रासम्भवादुपायान्तरस्य चासत्त्वात् प्रमात्वं न निर्णेतुं योग्यमितिपूर्वपक्षे ग्रन्थकारो मीमांसकमतमनुसृत्य तं समाधातुमुपक्रमते ननु स्वत एवास्तु तन्निरूपण-मिति। अत्र ग्रन्थकारस्य मीमांसकमतानामेव बुद्धिस्थत्वात् सर्वनामपठितेन स्वपदेन प्रमात्वाश्रयीभूतज्ञानग्राहिकाः सामग्र्यस्तादृशज्ञानग्राहकत्वेनानुगतेन रूपेणोपस्थाप्यन्ते। जनकतानिरूपितजन्यत्वं पञ्चम्यर्थस्तस्य च प्रमात्वनिश्चयात्मकनिरूपणपदार्थेऽन्वयात् स्वाश्रयज्ञानग्राहकसामग्रीजन्यः प्रमात्वस्य निश्चय इत्यर्थो लभ्यते।

इति प्रामाण्यग्रहे मीमांसकपक्षः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri